Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तार्किकालङ्कारिकचूड़ामणिमैथिलश्रोत्रिय-

पण्डितयदुनाथमिश्र-

निर्मितः

वसुजनावाद्ः

राजकीयसंस्कृतमहाविद्यालयसाहित्यप्रधानाध्यापक

पण्डितश्रीबदरीनाथशर्मणा

सम्पादितः।

वैशालीमुद्रणालयाधीशेन

बाबू श्रीभुवनेश्वरसिंहमहोदयेन

मुद्रयित्वा प्रकाशितः।

प्रथमावृत्तिः १०००] विक्रमाब्द १९९२ [मूल्यम् ।०)

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.



The Printed & Published by the Vaishali Press, Muzaffarpur.

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अवतरणिका

प्रायः प्रथितचरमेवेदं विदग्धविदुषां परिषदि यद् वैयञ्जनिकप्रतीतिगोचरमप्यर्थं केचन मानसमितिविषयतया, कतिचिदनुमाऽनुस्यूतत्वेन, परे स्मृतिसञ्जन्नतया, अपरेऽर्थापत्तिसमुत्थापितत्वेन, अन्येऽभिधा-लक्षणा-तात्पर्यान्यतमवृत्तिप्रत्याय्यतया, इतरे गगनकुसुमवदप्रसिद्धिकवलितत्वेन, केचिदनिर्वचनीयतयैव च व्यपदिशन्तः पक्षपातप्रसाधितस्वान्तास्तार्किकपुरस्सरा विपश्चिद्वरा औपपत्तिकतया प्रव्यक्तामपि व्यक्तिं निह्नोतुं सर्वतोमुखं प्रवर्तन्ते ।

शाब्दिकविशुद्धपार्ष्णिग्राहा स्त्वालङ्कारिकाः प्रतिपदं विवदमानानामपि तेषां पुरः प्रातिभपरिष्कृतेन पथा यथातथं प्रतिपक्षिपक्षानाक्षिपन्तः प्रसह्य तां व्यवस्थापयन्ति ।

तदेतत्तत्त्वरत्नानि निगूढार्थेषु तत्तन्निबन्धपाथोनिधिषु विप्रकीर्णानीति साकल्येन तान्याकलयितु मशक्नुवता मन्तेवसतां दुरुपदेशेन परिश्रमक्लेशेन जनिताविकम्पानुकम्पैः कियद्भिः सुहृद्भिरनुरुध्यमानः पदवाक्यरत्नाकरादिविवरणविरचनप्रतीतप्रौढ़ि दर्शनपारदृश्वा शब्दानुशासनकुशलः सदाचरण-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चणो मैथिलश्रोत्रिय स्तार्किकजयनाथशर्मात्मजन्मा यदुनाथ-शर्म्मा साहित्यवैपश्चितीपरिचितिं सङ्ख्यावद्भिसराय वितरीतुं व्यञ्जनावादमिमं प्रावधात्, राजकीयविहारोत्कलसंस्कृतसमित्यवयवीभूतशास्त्रविचारपरिषदे १९२९ खैष्ट-वत्सरे समर्प्य तन्निरीक्षकैः प्रेक्षावद्भिरवधारितं सभापतिभिश्चादरेण वितीर्णं प्रधानतमं पारितषिकं चावापत् ।

अथानतिचिरादेव वर्षीयस्या जनन्या सह सहृदय-समुदयाय नितरामसहनीयं शोकाभिभवं समुत्सृज्य तस्मिन्नकस्मात् त्रिदिवपथातिथीभूते, लघुशरीरोऽप्ययं ग्रन्थोऽर्थगरिमसम्पदा प्रतिपादयेदेव तद्वैदुष्यविशेषमितिनिश्चिन्वं स्तदीयम्मन्येष्वन्यतमोऽयंजनः प्रबन्धमेतं मुद्रयितु मायस्यत् ।

सचैष नानाविधशास्त्रीयग्रन्थरत्नप्रकाशनपरायणस्य-मिथिलाराजकुलकुमुदकलाकरस्य बाबूश्रीभुवनेश्वरसिंहमहोदयस्य साहायकसचिवेन रुचिरप्रबन्धेन मुजफ्फरपुरवर्तिनि वैशालीसमाख्ययन्त्रालये मुद्रित इति तस्मै धन्यवादान् सहस्रं प्रदाय, मानुष्यकसुलभानामिहत्यत्रुटीनां क्षमां कारुणिकानपश्चिमान् विपश्चितः—

राजकीयसंस्कृतमहाविद्यालयः
मुजफ्फरपुरम्
३-३-१९३६

प्रश्रितोऽभ्यर्थयते
बदरीनाथः

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥❀॥ श्रीराधाकृष्णाभ्यान्नमः ॥❀॥

अथ तार्किकालङ्कारिकचूड़ामणि-मैथिलश्रोत्रिययदुनाथमिश्र-प्रणीतः,

*वाक्यरञ्जनावाद्‌ः ॥

गुरुपितृचरणं प्रणम्य भूयो
हृदि विनिधाय गिरामपीश्वरीं ताम् ॥
ध्वनिजननिदान मञ्जनास्थं†
कविसमयं‡ प्रविवेक्तुमुद्यतोऽस्मि ॥१॥

अस्ति महाकविकालिदासादिभि स्तदनुसारिभिरन्यै-रपि रचितनिबन्ध-तदेकदेश-वाक्य-पद-तदेकदेश-तदर्थ-वर्ण-सङ्घटना-चेष्टाऽऽदिषु बोधकत्वेन स्थितम्, शब्दगतचारुत्वहेतुत्वेन प्रसिद्धेभ्योऽनुप्रासादिभ्योऽर्थगतचारुत्वहेतुत्वेनप्रसिद्धेभ्यो गु-णार्थालङ्कारादिभ्यो वैदर्भ्यादिरीत्युपनागरिकाऽऽदिवृत्ति-भ्यश्चभिन्नम्, वाच्यलक्ष्यार्थसामर्थ्याक्षिप्त--वस्तुवलङ्काररस-भावतदाभासभावशान्तिसन्ध्युदयशवलत्वाद्यनेकप्रभेदभिन्नम्, ध्वनिव्यङ्ग्यप्रतीयमानादिपदव्यपदेश्यम्, नायिकाऽङ्गेषु कर-चरणादितत्तदवयवव्यतिरिक्त मवयवसंस्थानविशेषाभिव्य-ङ्ग्यम्—

* वादस्तत्त्वबुभुत्सुकथा। † अञ्जना व्यञ्जना 'व्यापृतिरञ्जनम्' इत्यादि-दर्शनात्। ‡ समयः सिद्धान्तः।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

'मुक्ताफलेषुच्छायाया स्तरलत्वमिवान्तरा ॥
प्रतिभाति यदङ्गेषु तल्लावण्य मिहोच्यते ॥' इत्युक्तलक्षणलक्षितं लावण्यमिवानुभूयमानम्, यदभावात् पृथङ्निर्वर्ण्यमानकाणत्वादिदोषसामान्यशून्याङ्गवत्या मलङ्कृतायामपि लावण्यशून्येयमिति, कस्यांचिदनलङ्कृतायांकिञ्चिदङ्गदोषवत्यामपि यदन्वयादेव लावण्यामृतचन्द्रिकेयमितिव्यवहारवद् यद्व्यतिरेकादेव श्रुतिकटुत्वादिशब्ददोषापुष्टत्वाद्यर्थदोषाभाववति माधुर्यादिगुणोपमाऽऽद्यलङ्कारवत्यपि काव्ये नोत्तमत्वप्रयुक्तो ध्वनिव्यपदेशो, यदन्वयादेव च तद्व्यपदेशः, तस्यैवंविधस्यार्थस्य पदादिज्ञानान्वयव्यतिरेकानुविधायित्वाच्छाब्दबोधरूपस्य पदादिभिः सह सम्बन्धाभावे भगवदक्षपादाद्युक्तप्रणिधाननिबन्धाभ्यासाद्यन्यतमाभाववत्तदन्यविषयकानुभवस्य तद्विषयकस्मरणाजनकतया पदज्ञानेन तत्तदर्थानां स्मरणाभावे वाच्यार्थविषयकबोधानुदयवदन्वयप्रसङ्गात् पदादिभिः सह तादृशार्थस्य सम्बन्धोऽवश्यमेषितव्यः। स च वाच्यवाचकभाव-लक्ष्यलक्षकभावान्यतररूपो वक्ष्यमाणदूषणगणग्रासभया दसम्भवीति तृतीयो व्यङ्ग्यव्यञ्जकभावरूप एवेत्यालङ्कारिकाणां सिद्धान्तः।

तत्रकेचिदाहु§:— काव्यत्वस्य व्यासज्यवृत्तित्वे निर्दोषसगुण-सालङ्कारशब्दार्थोभयवृत्तित्वम्, अन्यथा रसात्मकवाक्यवृत्तित्वं रमणीयार्थप्रतिपादकशब्दवृत्तित्वं वा सर्वथैव सर्वस्मिन्नेतदाश्रये शब्दनिष्ठस्य चारुत्वस्यानुप्रासाद्यलङ्कारेभ्यः, शब्दसङ्घटनानिष्ठस्य च माधुर्यादिगुणेभ्यो ऽर्थनिष्ठस्योपमाऽऽद्यलङ्कारेभ्यो गुणेभ्यश्च सम्भवा दुपनागरिकाऽऽदिवृत्तीनामनुप्रासभेदान्तर्गतत्वाद् वैदर्भ्यादिरीतीनामपि गुणालङ्कार-

§ इतोध्वन्यभाववादिमतत्रयमुपपाद्य निराकरोति।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भिन्नत्वाभावाद् यत् काव्यगतचारुत्वप्रयोजकं, न तद् गुणालङ्कारव्यतिरिक्तमितिव्याप्तिनिश्चयात् काव्ये चारुत्वप्रयोजको गुणालङ्कारादिव्यतिरिक्तोऽपूर्वः कश्चिन्नास्त्येवेति तद्बोधसम्पादनाय तृतीयव्यापाराभ्युपगमो दूरापास्त एवेति ।

केचिच्च—सहृदयहृदयाह्लादजनकशब्दार्थमयत्वस्य काव्यलक्षणस्य गुणालङ्कारादिमत्येव सत्त्वं, तद्व्यतिरिक्तध्वन्यादिमयत्वस्य च तत्रस्वीकारे निरुक्तलक्षणाभावात् तस्य काव्यत्वमेव न स्यात् ।

न च काव्यनिष्ठतादृशवस्तुज्ञानवतामेव सहृदयत्वात् तद्धृदयाह्लादजनकत्वं च तत्राक्षतमितिवाच्यम् ।

स्वीयकल्पनाविषयसहृदयत्वादिघटितकाव्यलक्षणे सकलविद्वन्मनोग्राहकत्वानुपपत्तेरितिवदन्ति ।

अन्येतु— काव्ये तादृशवस्तुनः सत्त्वेऽपि चारुत्वप्रयोजकेषु गुणेषु माधुर्यादिषु, अलङ्कारेषूपमाऽऽदिषु वा तस्यान्तर्भावात्, सञ्ज्ञामात्रेण भेदप्रदर्शनेन कः पुरुषार्थातिशय इतितद्बोधकोऽतिरिक्तव्यञ्जनाव्यापारोदूरापेतइत्याचक्षते ।

अपरेतु— गुणालङ्कारादिव्यतिरिक्तस्य तादृशस्य काव्ये सत्त्वेऽपि, तत्प्रतीतेः क्वचिच्छक्त्यैव, क्वचिल्लक्षणया, क्वचिदनुमित्या, क्वचिन्मानससरणेन वोपपत्तौ किमर्थं तृतीयोव्यापारोऽभ्युपेय इत्यातिष्ठन्ते ।

तत्राद्या स्तादृशविलक्षणार्थसद्भावमेवापलपन्तो विपर्यस्ता एवं बोधनीयाः, यद् वक्ष्यमाणेषु काव्येषु विध्यादिस्वरूपवाच्यार्थविरुद्धनिषेधाद्यर्थस्याखिलसहृदयहृदयसाक्षिकस्यापलापविषयत्वाभ्युपगमे प्रत्यक्षादिनाऽनुभूयमानस्य घटादे रप्यपलापप्रसङ्गः । तथाहि—कस्याश्चिदविनयवत्या* उपपतिस-

* अविनयो व्यभिचारः ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

म्भोगसम्पादकतया जीवितसर्वस्वायमानसङ्केतनिकेतनीभूत-गोदावरीतीरनिकुञ्जाधिकरणकपुष्पावचयादिप्रयोजनकधार्मिक-सञ्चरणेन स्वस्यसम्भोगान्तरायसम्भवात् पल्लवकुसुमादी-नामवचयनेन विच्छायीकरणाच्च । कदाचित् सम्भोगसम्भवे-ऽप्यातपादिजन्मदुःखसम्भवात्, तत्र तत्सञ्चरणनिवारणा-योक्तौ— 'भमधम्मिअ'† इत्यत्र पूर्वं धार्मिककर्तृकत्वस्य तद-धिकरणकभ्रमणे स्वतःसिद्धत्वेनाप्राप्तप्रापणरूपविधे स्तत्र लो-ड्र्थत्वासम्भवेऽपि तादृशस्यापिभ्रमणस्य श्वभयेन धार्मिकेण त्यक्तत्वादतिसर्गप्राप्तकालार्थकत्वस्य लोटो निरावाधतया श्वभ-येनापोहितस्य भ्रमणास्य कालः शुनोमरणे प्रतिबन्धकाभावात् प्राप्त इत्याकारको वाच्यार्थो विधिरूपः, तद्बोधोत्तरंयेन त्वया शुनो विभ्यता ग्रामे तत्रच भ्रमणं त्यक्तम्, तस्य तव दृप्तसिंह-वद्गोदावरीतीरनिकुञ्जाधिकरणं महाभयकारकमेवातो मा तत्र भ्रमीरितितथाविधवाक्यार्थप्रतिषेधरूपार्थस्य प्रोषितपतिकां तरुणी मवलोक्य मदनशरपरवशीभूतं पान्थंप्रति तमुपभोक्तु-कामायाः स्वयन्दूत्या अविनयवत्या उक्तौ— 'अत्ता‡एत्थ' इ-त्यादौ सर्वावयवावच्छेदेन जलधेः सय्योँगानुकूलव्यापारस्य निमज्जते मुख्यार्थस्य बाधात् सर्वावयवावच्छेदेनाधस्सय्योँगा-नुकूलव्यापारस्यतद्विशेषस्य लक्षणया बोधे, 'गङ्गायांघोषः'

† 'भमधम्मिअ ! वीसद्धो सो सुणओ अज्ज मारिओ तेण ॥ गोला-णईकच्छकुडङ्गवासिणा दरिअसीहेण ॥' इति पूर्णः श्लोकः । 'भ्रम धा-र्मिक ! विश्रब्धः स श्वाऽद्यमारितस्तेन ॥ गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥' इति च्छाया ॥ ‡ 'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअ-सअंपलोएहि ॥ मा पहिअ ! रत्तिअंधअ ! सेज्जाए मह णिमज्जहिसि ॥' 'श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ॥ मा पथिक ! रात्र्यन्धक ! शय्यायामावयो र्माङ्क्षीः ॥' इति च्छाया ॥

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इत्यादौ तीरादिलक्ष्यार्थबोधानन्तरं शैत्यपावनत्वादीनामिव, गृहे विद्यमानाया अतिजरत्याः श्वश्रवावधिरत्वनिश्चेष्टत्वादिकस्य, द्वितीयेनात्रेत्यनेन—तच्छयनाधिकरणदेशभिन्नदेशवृत्तित्वस्य बोधे तया सहैकदेशे शयने कदाचिच्छङ्काऽपि स्यात्, सा न विधेयेत्यस्य, स्वस्य स्वापबोधकपदानुपादा न्निद्राराहित्यम्, तेन च निद्रितायाः प्रतिबोधार्थं किञ्चिद्व्यापारकरणे जरत्या अपि बोधेसति शङ्का स्यादितितदसम्भवस्य, कुत्साऽर्थककप्रत्ययेन— 'णिमज्जहिसि' इत्यनेनच—निन्दनीयत्वाद्यवगमानन्तरं 'समागमप्रतिकूलस्य दिनस्येदानीं सत्त्वेन मदनपरवशोऽपि भवान् कथंचिद् दिन मतिवाहयतु, प्राप्तायामेव रात्रौ मदीयायां शय्यायां मा शिलक्षः, अपितु निभृतनिभृतमेत्य निकटस्थितायाः कण्टकीभूताया जरत्या निद्राऽन्वेषेदत्तावधानः' इत्यस्य, रात्र्यन्धेत्यनेन—समागमस्य समुचिते रात्रिसमये सम्भाव्यमानविकाराकुलितत्वस्य । आवयोरित्यर्थे महणेतिनिपातो, नतु ममेत्यर्थकः । तथासति 'मत्कम्बले फालोनास्ति' इत्यादिवद् विशेषवचनत्वेनान्यशङ्काकारकत्वान्निगूढः समागमस्वीकारो न स्यात् । तेनच 'नावयोः शय्ययोः शयिष्ठाः, किन्तुममैव' इत्यस्य प्रतीत्यनन्तरं 'निश्शङ्कं मदीयशय्याया मागत्य रात्रौ व्यवहर' इत्याकारकस्य पूर्वविरुद्धार्थस्य, खण्डिताया नायिकायाउक्तौ—'वच्च*मह व्विअ' इत्यत्र व्रजेतिवाच्यार्थस्य विधिरूपत्वम्, तस्य च प्रवर्तनाज्ञानरूपस्येष्टसाधनत्वाद्यात्मकतया गाढ़ानुरागप्रयोज्यत्वं, नायिकाऽन्तरसङ्गमनेऽ-

* 'वच्च मह व्विअ एक्केइ होन्तु णीसासरोइअव्वाइं ॥ मा तुज्ज वि तीअ विणा दक्खिण्ण हअस्स जाअन्तु ॥' 'व्रज ममैवैकस्या भवन्तु निश्वासरोदितव्यानि ॥ मा तवापि तया विना दाक्षिण्यहतस्य जनिषत ॥' इति छाया ॥

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्यादङ्मुखरागगोत्रस्खलनादिमत्त्वंच नायके, तेनापिच पूर्वा-स्मत्कृतानुपालनरूपदाक्षिण्यमात्रप्रयोज्यैतत्स्थानाधिकरणक--स्थितिमत स्तव सर्वथा शाठ्यमित्याकारकस्य नायिकाऽभिप्राय-स्य वाच्यार्थाभावानात्मकत्वेन तन्निषेधानात्मकस्य स्वगृहमा-गतां नायिकां नायकस्य गोत्रस्खलनाद्यपराधे जाते ततः प्रति-गन्तुं प्रवृत्तां प्रियचाटूपक्रमपूर्वकं निवारयितुकामस्य नायकस्य, सख्योपदिश्यमानामपि तदवधीरणया गच्छन्तीं नायिकां पुनरुपदिशन्त्याः सख्या वोक्तौ— 'देआपसिअ'† इत्यत्र-वाच्यार्थप्रतिगमननिवर्तनरूपप्रतिषेधतो विलक्षणस्य निज-प्रतिगमनेन स्वात्मनो ममैव वा विघ्नं न करोषि, किन्त्वन्यासा-मप्यभिसारिकाणां निजमुखशशिज्योत्स्नया तमोनाशनेनाभि-सरणविघ्नं करोषीति तवापि सुखलवलाभो न भविष्यतीति-नायकाभिप्रायस्य, लघुतयाऽऽत्मनो बहुमानास्पदत्वविघातेन हताशा त्वमन्यासामपि विघ्नं करोषीति सख्यभिप्रायस्य वा, वस्तुतस्तदुभयत्रापि व्यवसितान्नायकप्रतीपगमनात् प्रियतम-गृहगमनाद्वा निवर्तस्वेति वाच्यार्थ एवोक्तार्थद्वयस्य पर्यवसा-नात् तस्य वाच्यार्थे गुणीभूततया प्रयोरसवदलङ्कार-विषय-त्वप्रसङ्गाद् ध्वनित्वानुपपत्तेः ।

काचित् प्रियतमं हठादभिसरन्ती तद्गृहाभिमुखमागच्छ-ता तेनैव हृदयवल्लभेन पूर्वपरिचितायाअपि प्रत्यभिज्ञानाभाव-मुपदर्शयतेव तामुपश्लोकयमानेन नायकेनोक्तवाच्यार्थविल-क्षणस्य 'अन्यासामपि विघ्नंकरोषि, तवचेप्सितलाभो भविष्य-

† 'देआपसिअ णिवत्तसु मुहससिजोण्हाविलुत्ततमणिवहे ! ॥ अहिसारि-आणँ विग्घं करोसि अण्णाणंवि हआसे ! ॥' 'प्रार्थये प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे ! ॥ अभिसारिकाणां विघ्नं करोष्य-न्यासामपि हताशे ! ॥' इति छाया ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तीति का प्रत्याशा ?, अतएव मदीयंगृहमागच्छ, त्वदीयंवा-गृहंगच्छावः' इत्युभयविधाभिप्रायस्यैव विधिनिषेधान्यतरा-नात्मकस्य प्रकाशीकरणं तत्रेतितादृशाभिप्रायस्य ।

उपपतिना खण्डिताधराया अविनयवत्याः कस्याश्चिद् भर्तृकर्तृकनिन्द्यतापरिहाराय तस्या भर्तारं तत्समीपस्थमवलोक-मानयाऽप्यनवलोकमानयेव कया चिद् विदग्धसख्योक्ते-'कस्स-वण होइ'* इत्यत्र भर्तृकर्तृकनिन्दावादंसहस्वेतिवाच्यार्थात् तन्नायिकामात्रोद्देश्यकबोधविषयादेकस्मात् प्रतिपाद्यमान-व्यक्तिभेदेनानेकविधस्य । तद्यथा— भर्तारंप्रति-भ्रमरवत्पद्मा-घ्राणकरणादस्या अधरः सव्रणो, नतूपपतिदंशनादिनेत्यावेद्य-मानापराधाभावस्य, नायिकां प्रतिच—सपत्नीमध्य इयत्खली-कृताऽसीति लाघवमात्मनि न मननीयम्, एतादृशनिन्दावाद-स्य भर्तुर्दयितत्व एव सम्भवेन बहुमानप्रयोजकत्वात् सौभाग्य-ख्यापनस्य, प्रतिवेशिनीः प्रतितु—प्रियतमेनाधिकमुपालभ्य-मानायां नायिकायां कुलटात्वशङ्काया स्तादृशोपपतिकर्तृकोप-भोगस्य सभ्रमरपद्माघ्राणजन्यव्रणादिमत्त्वस्याधरे प्रत्यायनेना-च्छादनान्निवारणस्य, सपत्नीं प्रति पुन-स्तदुपलम्भनप्रहृष्टायां तस्यां प्रियाया एव ह्येवंविधदोषदर्शने भर्त्तू रोषो नाप्रियाया इतिसौभाग्यातिशयख्यापनस्य, उपपतिं प्रतिच—'इदानी-न्तनमेतद्दशनक्षतादिकं कथञ्चिन्मया समाहितम्, अतःपरं त्व-यैवं न विधेयम्' इत्यस्य, 'अहमेवंसमाधाननिपुणाऽतो मय्येव विश्वसिहि' इति—प्रतिवेशिनीः प्रतिचार्थस्य भिन्न-

* 'कस्स वण होइ रोसो दट्ठूण पिआएसव्वणं अहरम् ॥
सभमरपउमग्घाइणि ! वारिअवामे ! सहसु एह्मि ॥'
'कस्यवा न भवतिरोषो दृष्ट्वाप्रियायाः सव्रणमधरम् ॥
सभ्रमरपद्माघ्रायिणि ! वारितवामे ! सहस्वेदानीम् ॥' इतिच्छाया

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भिन्नस्यैव ।

एवं 'मात्सर्यमुत्सार्य विचार्य कार्यम्' इत्यत्र वाच्यार्थात् पर्वतनितम्बे सेव्यत्व-तदभावयोः, कामिनीनितम्बेच सेव्यत्व-तदभावयोः संशयरूपाद्विरुद्धस्य, शान्तरसप्रधाने वक्तरि पर्वतनितम्बे सेव्यत्वस्य, शृङ्गाररसप्रधाने च तस्मिन् कामिनीनितम्बे तस्य निश्चयरूपस्य ।

एवं 'कथमवनिप* ! दर्पः' इत्यत्र जीवत्येव त्वयि तवात्यन्तवल्लभा कीर्ति हीनाङ्गैरपि शत्रुभिरपहृतेति-तत्तद्रिपुसम्बन्धिलक्ष्मीहरणकर्तृत्वप्रयोज्य स्तवगर्वोऽनुचित इत्याकारकवाच्यार्थाद् व्यतिरिक्तस्य तद्विरुद्धस्य च त्वया शत्रूणां प्राणापहारे कृते, तैःसहैव त्वत्कीर्त्ति स्त्रिदिवपर्यन्तं गतेत्यस्य स्तुतिरूपस्य चार्थस्य सहृदयहृदयसाक्षिकस्य सत्त्वेऽपि, यदि तादृशार्थसामान्याभाव एव जगति स्यात् , तदा प्रत्यक्षादिगृहीतघटादिपदार्थानामप्यपलापः सुकर एव तेषांभवेदिति सर्वशून्यतावाद एव पर्यवसन्नःस्यादिति ।

द्वितीयश्च ध्वनिसद्भाव मभ्युपगच्छन्नपि गुणलङ्कारादिमति काव्येऽधिकस्य ध्वनेरपि सत्त्वे सहृदयहृदयाह्लादजनकत्वाभावप्रसङ्गं सम्भाव्य काव्यलक्षणमप्रसञ्जयन्नुक्तेषु तत्तद्ध्वनिमत्सु काव्येष्वनुभूयमानेष्वाह्लादविशेष मनुभवद्भिः सहृदयैरेव शिक्षणीयः ।

तृतीयस्तु वाङ्मात्रेण गुणालङ्कारादिषूक्तध्वनीना मन्तर्भावं प्रतिजानानोऽपि तदन्तर्भावप्रकारस्यादर्शनादुपेक्षणीय एव सहृदयानाम् ।

* 'कथमवनिप ! दर्पो यन्निशातासिधारा-दलनगलितमूर्ध्नां विद्विषां स्वीकृता श्रीः ॥ ननुतव निहतारेरप्यसौ किं न नीता, त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिः ॥' ॥

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अथावशिष्यते चतुर्थः पक्षः, तदुपपत्तिप्रकारश्चेत्थम्—दर्शितेषु 'भम धम्मिअ !' 'अत्ता एत्थ' इत्यादिषु सर्वत्रैवोक्ततत्तद्वाच्यार्थाना मभिधाशक्त्या बोधे जातेऽपि, ध्वनित्वेनाभिमततत्तन्निषेधविध्यादीनां वाच्यार्थविरोधिनां तदविरोधिनां च वक्तृतात्पर्यशक्तिमतां बोधमनुत्पाद्य तादृशशक्तेः पर्यवसानासम्भवात्, तयैव तेषां बोधः ।

अथवा दृप्त-धार्मिक-तदादिपदानां दर्पवत्त्व-धर्माचरणशीलवत्त्व-गोदावरीनिकुञ्जवासित्वेन प्रसिद्धत्वविशिष्टादीनां वाच्यार्थानां येषां सिंहादौ दर्पाभाववति तादृशत्वेनाप्रसिद्धे तन्नायिकाश्रेयोविघातकर्तरि पुरुषादौ बाधः, तेषांविरोधसम्बन्धस्यान्येषां वाच्यार्थानां चान्यविधसम्बन्धानां तत्तदर्थे सत्त्वाल्लक्षणयैव बोधस्य 'उपकृतं बहुतत्र किमुच्यते' इत्यादाविवोपगन्तव्यतया भ्रमेत्यादिपदानामपि तादृशलक्षणाबलेन माभ्रमेत्याद्यर्थे लक्षणायाः सम्भवेन तयैव तेषां बोधः सुलभः ।

एवं ध्वनिमत्त्वेन प्रसिद्धेष्वन्यत्रापि काव्येषु ध्वनित्वेनाभिमततत्तदर्थानां लक्षणाऽऽदिनैव बोधः । तथाहि—'मुखं विकसितस्मितम्†' इत्यत्र भूयोऽवयवावच्छिन्नावयवान्तरासय्युँक्तपुष्पावयववृत्तिसय्योँगस्य प्रचयरूपस्य नाशको भूयोऽवयवावच्छिन्नावयवसय्योँगजनको यो विभागः, तदनुकूलव्यापारस्य विकसते वाच्यार्थस्य—

'ईषद्विकासिनयनं स्मितंस्यात्‡ स्पन्दिताधरम्' इत्युक्तलक्षण-मुखावयवविभागजनकव्यापारविशेषात्मकहास्यविशेषे स्मिते, कृतिप्रयोजकव्यापारजनककृतिरूपस्य वशीकरणस्या-

† 'मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं, समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ॥ उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं, वतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥' । ‡ विश्वनाथेनोक्तमिदम् ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रणस्य राजादिष्वेव सत्त्वात् तन्मात्रस्मरणस्य तेभ्योजातत्वेऽपि राजादिबोधानन्तरं गजादीनांबोधस्य विशिष्टवाक्यार्थविषयकस्य शाब्दात्मकस्य तत्रानुत्पादेऽपि, राजाद्येकसम्बन्धिज्ञानेऽपरसम्बन्धिनां तेषां मनसा स्मरणे बाधकाभवात् तेनैव तत्प्रयोजननिर्वाहः ।

सुगन्धिमांसभोजनप्रकरणे— 'सुरभिमांसं* भवान् भुङ्क्ते' इत्यभिधाने, 'यस्याननं योनिरुदारवाचाम्'† 'योनिरोधोमयाऽऽरब्धः'‡ 'जैमिनीयमलंधत्ते§ रसनाया मयंद्विजः' इत्यादौतत्तद्वाच्यार्थानां जुगुप्सितत्वाभावादजुगुप्सितार्थानां गवादीनां सुरभ्यादिपदानांप्रकरणादिना शक्ते रेकतरसौरभवत्त्वाद्यर्थमात्रस्मरणानुकूलत्वेन तेभ्यः स्मरणासम्भवाद् विशिष्टवाक्यार्थबोधस्यासम्भवेऽपि सहृदयानां तत्रतत्र जुगुप्सोदयो नानाऽर्थकपदस्थले प्रकरणादीनां शक्तिनियन्त्रकत्वं न तादृशस्मरणाननुकूलत्वे सत्येकतरार्थस्मरणानुकूलत्वम्, किन्तु नानाऽर्थकपदेभ्यो नानाऽर्थविषयके स्मरणे जाते प्राकरणिकाद्यर्थमात्रस्य शाब्दीयविषयताप्रयोजकत्वम् । तथाच जुगुप्सितार्थानां शाब्दबोधाभावेऽपि स्मरणस्य निराबाधतया तत एव तत्तत्काव्येषु हेयत्वप्रत्ययः ।

'गतोऽस्तमर्कः' इतिवाक्यश्रवणानन्तरं वाच्यार्थस्यास्तंकर्मकगमनकर्तुः सूर्यस्यबोधे जाते 'शत्रवो हठेनाहवे मर्दनीयाः' 'सान्ध्यो विधिरुपास्यः' इत्याद्यनेकविधस्यार्थस्य हस्तिहस्तिपकयोः पाल्यपालकभावसम्बन्धज्ञानवत स्तदेकतरज्ञानेनापरस्मरणमिव, सूर्यास्तमयस्य तत्तदर्थेषु यस्मिन् यस्यपुंसः

* सुरभिर्गौः । सुरभिसुगन्धि च । † योनिरुत्पत्तिस्थानम्, भगंच । ‡ योनिरोधोनिवर्तनम्, योने रोध आच्छादनञ्च । § जैमिनीयम् पूर्वमीमांसाम्, अलंपर्याप्तम् । जैमिनीयानां मीमांसकानां मलंच ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सम्बन्धज्ञानम्, तेन पुंसा तदर्थस्मरणं सुलभमेवेति तत्रतत्रोक्तरीत्यैवोक्तार्थानां प्रतीतेः सम्भवान्न तदर्थं व्यञ्जनाऽऽद्याख्य स्तृतीयो व्यापारोऽभ्युपेतव्य इति ।

साच तात्पर्यशक्ति र्नाभिधालक्षणाभ्यामतिरिक्ता काचित्, किन्तु नानाऽर्थकपदेभ्यो नानाशक्तिज्ञानवतां तत्सर्वेषा मेवार्थानां स्मरणे शाब्दबोधप्रसङ्गवारणाय वक्तुस्तात्पर्यं यत्रार्थे, तस्यवार्थस्य स इत्येतदर्थं तात्पर्यज्ञानस्य कारणत्वं शाब्दबोधेऽभ्युपेयते, नत्वेकविधार्थबोधानन्तरं द्वितीयार्थबोधाय ।

येरपि तात्पर्यशक्ति रतिरिक्ता स्वीक्रियते, तेषामप्युक्तप्रयोजनत्वमेव तस्या अभिमतम्, नतु द्वितीयार्थबोधजनकत्वमितिकुतस्तस्या स्तज्जनकत्वसम्भवः ।

अभिधाशक्ति श्चैकस्मिन्नेव पदे विरुद्धभावाभावोभयनिरूपिता न कुत्रापिदृष्टा, प्रमेयादिपदानां प्रमेयत्वादिनैव भावाभावयो र्बोधकत्वम्, नतु तत्त्व-तदभावत्वादिनेति, भ्रमेत्यादेरेकस्यैव पदस्य कुतोन भ्रमणतदभावयो र्भ्रमणत्वादिना शक्तिः स्यात् ।

निर्बन्धितया तथाऽपि तस्याः स्वीकारे योग्यताज्ञानादिमात्रसहकारिण स्तज्ज्ञानस्य सत्त्वे सर्वेषामेव तत्तदर्थबोधप्रसङ्गः ।

एवं 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये* ॥' इत्यादिनामम्मटभट्टः काव्यस्यानेकप्रयोजनत्वे दर्शितेऽपि— 'अदोषं गुणवत् काव्य मलङ्कारैरलङ्कृतम् ॥
रसान्वितं कविःकुर्वन् कीर्तिं प्रीतिं च विन्दति ॥'
इत्यग्निपुराणे भगवद्व्यासपादोक्त्या,

* 'सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' इत्यग्रिमांशः ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

'नीरसो हि निबन्धो यः सोऽपशब्दो महान् कवेः ॥
स तेनाकविरेव स्या--दन्येनास्मृतलक्षणः ॥'

इति ध्वनिकारोक्त्या,

'स्वादुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा ॥
तथैव नीरसंकाव्यं स्यान्नो रसिकतुष्टये ॥'

इत्यभियुक्तोक्त्या च रसप्रतीतेरेव तस्य, मुख्यप्रयोजनत्वं सहृदयहृदयसाक्षिकतया च निर्णीतम् ।

रसश्च 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इतिभरतसूत्रानुसारेण मायिकाचन्द्रोदयादीन्यालम्बनोद्दीपन-विभावरूपाणि कारणानि, वाङ्मनसबुद्धिशरीरजन्यानि कटाक्षभुजविक्षेपस्वेदस्तम्भादीन्यनुभावपदव्यपदेश्यानि कार्याणि, व्यभिचारिपदव्यवहार्याणयौत्सुक्यादीनि च सहकारीणि, तैः सह संयोगात् सम्बन्धान्निष्पद्यमानं विभावादिसंवलितानन्दांशे भग्नावरणमनोवृत्तिविशेषात्मकरत्याद्यवच्छिन्नं चैतन्यम्, 'पुत्रस्तेजातः' इत्यादिवाक्यश्रवणादिजन्यलौकिकानन्दविलक्षणः सहृदयसाक्षिको विभावादिप्रतीतौ तन्मयीभावेनास्वाद्यमानः सुखविशेषो वा ।

तत्प्रतीतिश्च 'रसोवैसः' इतिश्रुत्या ब्रह्मज्ञानात्मकतया मुमुक्षूणां वेदान्तवाक्यादिभ्य इव सहृदयानां काव्येभ्योऽवश्यमेषिता ।

काव्यघटकपदानां वाच्यार्थबोधानन्तरमेव तस्या दर्शनात् पदज्ञानान्वयव्यतिरेकानुविधायित्वा दन्वयबोधात्मकत्वमेवावश्यकम् । तद्वाचकशृङ्गारादिपदस्य तज्जन्योक्तरसबोधस्य स्वशब्दोपात्तत्वेन निगीर्णतुल्यतायाः सहृदयैरनुभूयमानत्वेन विभावादिवाचकपदसत्त्वे तस्यासत्त्वेऽपि तादृशरसप्रतीतेरुदयेन चान्वयव्यतिरेकाभ्यां विभावादिवाचकपदजन्यत्वस्यै-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वावधाणात् पदेनसहासम्बद्धस्यार्थस्य तेन स्मरणाद् विभावादिवाचकपदै स्तस्यसम्बन्धोऽवश्यं वाच्यः । सच न शक्तिस्वरूपः, तार्किकमतेनित्येच्छाया स्तद्विषयतायावा, 'औत्पत्तिकस्तु* शब्देनार्थस्य सम्बन्धः' इतिजैमिनीयसूत्रानुसारेण स्वाभाविकस्यैवार्थप्रतीतिजननसामर्थ्यस्यातिरिक्तपदार्थस्वरूपस्यवा मीमांसकमते, शक्तितया, विभावादिपदनिरूपिताया स्तस्याः–विशेषेण भावयन्ति पूर्वानुभूतान् रत्यादीन् स्थायिभावान् वासनारूपतयेदानींस्थितान् रसास्वादाङ्कुरस्येषद्रसाभिव्यक्तिरूपस्य विषयताप्रयोजकतांनयन्ति, एव मनुपश्चाद् भावयन्ति तादृशान् रत्यादींस्ततआधिक्येन प्रतीतिविषयतां प्रापयन्ति, एवं विशेषेणाभितः सर्वतः सर्वावयवावच्छेदेन रत्यादींश्चारयन्ति विशेषेणाभिमुख्येन कार्योत्पादानुकूल्यवत्त्वेन चरन्तीतिवा व्युत्पत्त्या पूर्वोक्तनायिकाचन्द्रादिष्वेव सत्त्वेन तत्तन्नायिकाऽऽदिवाचकसीताऽऽदिपदानामपि रूढ़े स्तत्रतत्रैव कोशादिनानिर्णीतत्वेन च काव्यघटके कस्मिन्नपिपदे रसनिरूपिताया स्तस्या असम्भवात् ।

अतएवोक्तभरतसूत्रव्याख्यानपरायाम्— 'व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसःस्मृतः' इति काव्यप्रकाशकारिकायां सहार्थकतृतीयन्तं 'विभावाद्यैः' इत्युपात्तम् ।

अन्यथा तैरित्येतावतैव विभावादिपदशक्यार्थलाभे तस्य वैयर्थ्यापातात् ।

नच 'यत्परः शब्दः, शब्दार्थः' इतिमीमांसकसिद्धान्ताद् विभावादिवाचकपदघटितानां काव्यादीनां रसादितत्तदर्थपरतया ध्वनित्वाभिमता अखिला एवार्था अभिधाव्यापारेणैव श-

* औत्पत्तिकशब्दोऽत्रलक्षणया नित्यार्थप्रतिपादकोऽभिहितस्तद्व्याख्यातृभिः ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ब्दार्था इतिवाच्यम् ।

यत्पर इत्यादि रनेकपदघटितवाक्यघटकपदैरनेकेष्वर्थेषूपस्थापितेष्वप्राप्तप्रापणरूपविधेर्यत्रपर्यवसानं सएव शब्दस्य विधिवाक्यस्यार्थः स्वार्थान्वितत्वेन प्रतिपाद्य इत्यर्थोयथा– 'लोहितोष्णीषाऋत्विजः प्रचरन्ति' 'दध्नाजुहोति' इत्यादौ वैदिकवाक्ये, 'रक्तं पटं वय' इत्यादौ लौकिकवाक्ये च । तत्र हि 'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते' इतितत्सिद्धान्तो भूतं सिद्धं, भव्यं साध्यं, तयोः सम्भूयोच्चारणे समभिव्याहारे सति, सिद्धंपूर्वकालिकज्ञानविषयीभूतं, साध्यायाज्ञातांशज्ञापनायैवोपदिश्यते, नतु स्वस्य ज्ञानायेत्यर्थकः । ज्ञानं च विधेयतया विवक्षितम् । तेन सिद्धांशेऽन्यविधविषयताया स्तत्रतत्र सत्त्वेऽपि नासङ्गतिः ।

एवञ्च लोहितोष्णीषा इत्यादौ कारकपदोपस्थाप्यर्त्विगादीनां सिद्धानां साध्यीभूतप्रचरणादिक्रियाऽन्विततया साध्यायमानत्वेऽपि, यथा दग्धदहनीययो र्द्वयोरपि हुताशनसम्बन्धेऽदग्धमात्रं हुताशनो दहति, नतु दग्धांशमपि, तथा लोहितोष्णीष–ऋत्विक्प्रचरणानां दधिकरणत्वहवनानां रक्तत्वपटवयनानां मध्ये येषामन्यतः प्राप्ततया सिद्धत्वं, तान् विहाय लौहित्यकरणत्वादावेव प्रचरन्तीत्यादिविधिवाचकस्य लड़ादेरर्थस्य विधेरन्वयात् तादृशवाक्यस्य तत्परतया तस्यैव तादृशवाक्यार्थत्वम्, नतुऋत्विगादिपदोपस्थाप्य ऋत्विगादीनामपीति व्यङ्ग्यत्वाभिमतरसादीनां तत्तत्पदैः सह सम्बन्धाभावे तेभ्य उपस्थिते रसम्भवात् तात्पर्यस्य तेषु सत्त्वेऽपि तेषां तत्तच्छब्दार्थत्वासम्भवात् ।

तत्तत्पदोपस्थापितत्व मनादृत्य प्रतीतमात्रे यदि तात्पर्यसत्त्वे शब्दार्थत्वम्, तदा परोधावतीत्यादौ परपदार्थस्य

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पूर्वपदार्थनिरूपितत्वनियमात् परस्य बोधे पूर्वज्ञानस्यावश्यकतया तस्यापि परपदार्थत्वप्रसङ्गः ।

नचैवं 'विषं भुङ्क्ष्व, माचास्य गृहे भुङ्क्थाः' इत्यत्र विषं भुङ्क्ष्वेतिवाक्यस्य विषकर्मकभोजनानुज्ञाबोधकत्वेऽपि माचेत्यादिवाक्यार्थएवतात्पर्यं, नतु विषकर्मकभोजनेऽपीति कथं निर्वहेत्, विषादिपदै स्तत्तदर्थाना मनुपस्थापनादिति तद्वाक्यप्रतीतमात्रे तद्वाक्यवर्तियत्किञ्चित्पदोपस्थापित एव तद्वाक्यतात्पर्यं वाच्यमित्यतएव परोधावतीत्यत्र पूर्वस्य पदार्थत्ववारणम्, तस्य केनापि पदेनानुपस्थापनात्, व्यङ्ग्यार्थघटकयत्किञ्चिदर्थस्य तद्वाक्यवर्तिपदोपस्थापितत्वात् तत्तच्छब्दार्थत्वसम्भव इतिवाच्यम् ।

विषंङ्क्ष्वेत्यस्य माचेत्यादिना चकारेणैकवाक्यतायाः सूचनेनाख्यातद्वयवाच्यक्रिययोः साक्षादन्वयस्य 'गुणानां च परार्थत्वा दसम्बन्धः समत्वात् स्यात्' इतिन्यायेनासम्भवात्, सुहृदुक्तस्य तद्वाक्यस्यानन्वितार्थत्वासम्भवाच्च माचास्येत्यादिप्रधानवाक्यार्थे विषमित्याद्यङ्गवाक्यार्थस्य माचेतिनिषेधार्थकमाशब्दसमभिव्याहृत--लोड्र्थवलवदनिष्टसाधनताघटकबलवत्त्वस्य ससम्बन्धिकपदार्थतया नित्यसाकाङ्क्षत्वेन तदवधित्वस्योपस्थितत्वाद् विषभोजनएवान्वयाद् विषकर्मकभोजनादप्येतद्गृहाधिकरणकभोजन मनिष्टसाधनमित्यस्या तत्तत्पदोपस्थापितार्थस्यैव बोधनाद् यत्किञ्चित्त्वाघटिततत्तत्पदोपस्थापितत्वस्यैव तत्तत्परत्वप्रयोजकत्वं, नतुतद्घटितस्यैवेति व्यङ्ग्यार्थानां तत्तत्पदोपस्थापितत्वस्यैव विरहात् कथं तत्परत्वं वाक्यस्य, कथंवा तदर्थत्वं तस्येति ।

यदपि कैश्चित्*— यथा सन्धानप्रक्षेपनिपुणबलवत्पुरु-

* मीमांसकैकदेशिभिः । 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इत्यादिना तदुपन्यासः ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रेर्यमाण एकएव शरः प्रेरकपुरुषावधिकदूरदेशावस्थितस्यापि सपत्नस्य बाह्यशरीराच्छादककवचभेदने दीर्घेण, शरीरावयव-वक्षोभेदने दीर्घतरेण, शरीरान्तस्सञ्चारिप्राणवायो श्चरमशरीरसय्योँगध्वंसजनने दीर्घतमेन स्वीयवेगाख्यव्यापारेणोक्तत्रितयमपि कार्यं करोति, तथा विशिष्टवक्त्रादिप्रयुक्त एक एव शब्दः पदज्ञानमात्रसहकारितया पदार्थस्मरणे दीर्घेणाकङ्क्षाज्ञानादीना मधिकानामपि सहकारितया विशिष्टवाक्यार्थबोधजनने दीर्घतरेण, बोद्धव्यकाक्षाद्यधिकसहकारितया व्यङ्ग्यार्थबोधजनने दीर्घतमेन स्वीयशक्त्याख्यव्यापारेणैव त्रितयमपि कार्यं जनयिष्यतीतिकृतं व्यञ्जनयेत्युक्तम् ।

तदपि पदश्रवणानन्तरप्रतीतेषु यावत्स्वेवार्थेषु पदस्य शक्तेरेवाभ्युपगमे 'चैत्र ! पुत्रस्तेजातः, कन्याते गर्भिणी' इत्यादिवाक्यश्रवणे चैत्रस्य हर्षशोकयोरपि प्रतीयमानतया तयोरपि तद्वाक्यस्थपदानां शक्तिसिद्धिप्रसङ्गादसङ्गतमेव ।

नच तत्र हर्षशोकयो र्न तद्वाक्यजन्यप्रतीतिविषयत्वम्, किन्तु चैत्रस्य तद्वाक्यबोधानन्तरं जातयो स्तयो र्मुखप्रसादमुखमालिन्याभ्यामनुमेयत्वमेव । शक्तिश्च तद्वाक्यजन्यप्रतीतिविषयेष्वखिलेष्वर्थेष्वित्यभिप्राय स्तेषामितिवाच्यम् ।

तथासति गङ्गायां घोष इत्यादौ तीरादितत्तल्लक्ष्यार्थानामपि तत्तद्वाक्यजन्यप्रतीतिविषयतया तत्रापि तत्तत्पदानां शक्तेरेव सम्भवाल्लक्षणाया उच्छेदापत्तेः ।

तत्रेष्टापत्तौ च 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां† समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इतिसूत्रेण भगवता जैमिनिना प्रतिपादितस्योत्तरोत्तरेषां दौर्बल्यस्य, पूर्वपूर्वेषां बलीयस्त्वस्यचासङ्गतिप्रसङ्गात् ।

† अस्य विशदव्याख्यानं प्रदीपेऽवलोकनीयम् ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

'अर्थविप्रकर्षात्' इत्यनेनार्थानां क्रमिकबोधजनकत्वस्यैव तद्बीजस्य प्रतिपादनात् । तस्य च 'व्रीहीनवहन्ति' 'बर्हिर्देवसदनं दामि' 'कदाचन स्तरीरसि नेन्द्र ! सश्चसि' 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यादिषु सर्वत्रैव तत्तत्प्रतिपाद्येष्वर्थेषु तत्तत्पदानामभिधाया एव सम्भवादभावात् ।

शरदृष्टान्तश्च प्रकृतेऽनुपपन्नः, दृष्टान्तदार्ष्टान्तिकयो र्वैषम्यात् । वेगव्यापारस्य स्वरूपसत एव कवचादिविदारणहेतुत्वेन दीर्घत्वादेस्तत्रसम्भवेऽपि शक्तेर्ज्ञाताया एव शाब्दबोधोपयोगितया तज्ज्ञानस्य च व्याकरणादिभिरेव व्युत्पादिततया व्यङ्ग्यत्वेनाभिमतार्थेषु तत्तत्पदशक्तिज्ञापकव्याकरणादीना मभावेन तस्योत्पत्ते रेवासम्भवे कथं दीर्घदीर्घतरत्वसम्भावनाऽपि ।

अपिचैकस्यैव व्यापारस्य दीर्घत्वं दीर्घतरत्वं चासम्भावितमेव, भिन्नकार्यजनकत्वात् । अनेकत्वेऽपि समानजातीयत्वमसमानजातीयत्वं वा ? । आद्ये शब्दबुद्धिकर्मणां विरम्य व्यापारस्य पदार्थतत्त्वज्ञै र्निषिद्धतयैकविधबोधानन्तर मपरबोधानुपपत्तिः । द्वितीये च व्यञ्जनावादएव विश्रामः, अस्माभिरप्यभिधादिविजातीयाया एव तस्या अभ्युपगमात् ।

अपिच पदश्रवणानन्तरमेव वृत्तिज्ञानवतः पुंसो वाच्यार्थबोधः । व्यङ्ग्यस्य तु बोधेजननीये वक्तृबोद्धव्यवाच्यादिवैशिष्ट्यज्ञानं जन्मान्तरीयतत्तदर्थज्ञानजनकत्वज्ञानजन्योद्बोधवत्संस्कारवत्त्वंच सहकारितयाऽपेक्ष्यते । अतएव स्वरूपसत्या एव व्यञ्जनाया स्तत्तद्बोधहेतुत्वस्य सिद्धान्तितत्वेऽपि न सर्वेषां सर्वपदेभ्यः सर्वदा बोधः । स्वरूपसती सा कारणमित्यस्य जन्मान्तरपरिगृहीताऽपि सा तत्तत्पदज्ञानमुद्बोधकमवाप्योद्बुद्धेन संस्कारेण कार्यं जनयतीत्यर्थात् ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तथाच वाच्यार्थबोध-व्यङ्ग्यार्थबोधयोश्च कालभेदः। वाच्य-वाचकभावसम्बन्धस्य ज्ञानमेव, तदपि तद्ग्राहकत्वेन प्रसिद्ध-व्याकरणादिमात्रादेव, व्यङ्ग्यव्यञ्जकभावयोश्च स्वरूपसतोरेव ज्ञानमपि सहृदयत्वादिविशेषवतामेव ज्ञापकमिति ज्ञापकस्य-भेदः। पूर्वयोः पद-तदर्थैकमात्रनिष्ठत्वम्, अपरयो र्वाक्य-पद-तदेकदेश - काकु -वर्ण-सङ्घटना-पदार्थ-वाक्यार्थादिनिष्ठत्व-मित्याश्रयभेदः। वाच्योऽर्थःसर्वान् प्रतिपत्तॄन्प्रत्येकविधएव, व्यङ्ग्योऽर्थस्तु तत्तत्प्रतिपत्तृभेदेनानन्तस्वरूपः। यथा— 'कस्स व ण होइ' इत्यत्र 'गतोऽस्तमर्कः' इत्यत्रचोक्तः। अनुक्तोऽपि तदन्यत्रानेकविधेषु, तत्रापि च सहृदयैः स्वयमूहनीय इति स्व-रूपभेदः। एवं विधिनिषेधरूपतया संशयनिश्चयोभयविषय-रूपतया च पूर्वोक्तेऽन्यत्रापिचानेकविध एवेतिकालस्वरूपाश्र-यज्ञापककालादिभेदेऽपि वाच्या एव तेऽर्था यदि, तदा घटपटा-दीनामपि को भेदक इति तएव प्रष्टव्याः।

यदप्युक्तं लक्षणयैव तेषां बोध इति। तदपि लक्षणा-प्रयोजकमुख्यार्थबाधादेरभावेन तस्या असम्भवात् साहसमेव। तथाहि— 'भमधम्मिअ!' इत्यत्र भ्रमादिपदार्थेषु मध्ये एक-त्रापरार्थसम्बन्धवत्त्वादेव न बाधः। दृप्त-धार्मिकतत्पदानां दर्पवद्धर्माचरणशीलवत्प्रसिद्धानां मुख्यार्थानां दर्पाभाववति सिंहे परश्रेयोविघातकर्तरि पूर्वकालिकतात्स्थ्येनाप्रसिद्धे बा-धात् तद्बलेन विपरीतलक्षणया वाच्यार्थविधिविपरीतस्य त-न्निषेधस्य प्रतीतिः स्यादिति च न साम्प्रतम्, यथा 'गङ्गायां घोषः' 'सिंहोमाणवकः' इत्यादौ योग्यताविरहाद् बुभूषन्नेवान्वयः प्रतिहन्यते, तथा 'तव भ्रमणनिषेद्धा पूर्वमन्यथाऽपि निश्चितः स श्वा सिंहेन हतः, तदिदानीं भ्रमणनिषेधकारणनिवृत्त्या तव-भ्रमणमुचित' मित्यन्वयो न केनापि प्रतिहन्यते, योग्यताऽऽ-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दीनां सत्त्वात् ।

व्यङ्ग्यार्थवाच्यार्थयो र्विरोधोऽपि तयोः पूर्वापरीभावेनोत्पादे सत्येव भासते, न तत्पूर्वमित्युत्पन्ने तादृशनिषेधप्रत्यये किमर्थं लक्षणाऽभ्युपगमः । पूर्वञ्च विरोधज्ञानाभावादेव न विपरीतलक्षणायाः सम्भवः । 'उपकृतं* बहु तत्र' इत्यादौ च वाच्यार्थस्य बोधो न जायते, किन्तु लक्ष्यार्थस्यैव । अतएव द्वयोरप्यन्वयबोधः सहृदयहृदयसाक्षिक इतितद्दृष्टान्तेनात्र न विपरीतलक्षणाप्रसर इति ।

एवं 'मुखं विकसितस्मितम्' इत्यादौ ध्वनित्वेनाभिमतानां लोकोत्तररमणीयत्वादीनां पूर्वमनुपस्थितौ तदवच्छिन्ने तद्विशिष्टोक्तलक्ष्यार्थविशिष्टे वा कथं शक्यसम्बन्धरूपलक्षणाया ज्ञानं सम्भवति, विशिष्टबुद्धौ विशेष्यताऽवच्छेदकप्रकारकज्ञानस्याप्यन्यत्र दर्शितयुक्त्या कारणत्वव्यवस्थापनात् ।

किञ्च तत्रैव लक्षणाया उपगमो, यत्र रूढेः प्रयोजनस्य वा सत्त्वं, मुख्यार्थबाध, स्तात्पर्यान्वययोरेकतरानुपपत्तिश्च । तत्र व्यङ्ग्येऽर्थे तत्तत्पदप्रयोगस्य कोशव्याकरणादीनां चाभावेनानादितात्पर्याभावान्न रूढिः । प्रयोजनं च यथा गङ्गापदलक्ष्यतीरबोधे जाते शैत्यपावनत्वप्रतीति गंङ्गातीरे घोष इतिवाक्यजन्यशक्यार्थतीरबोधानन्तर मनुत्पद्यमाना । अन्यथा स्वाधीने शब्दप्रयोगे किमित्यवाचकं प्रयुञ्जीत । तथोक्तव्यङ्ग्यार्थबोधानन्तरं जायमाना न काचित् तदतिरिक्तार्थविषयिका प्रतीतिरस्ति । यथाकथञ्चिदर्थस्य तथाविधस्य कथञ्चित् सम्भवेऽपि 'तत्प्रतीतिः कुतः' इतिजिज्ञासायां तस्यापिलक्षणानिरूपकत्वोपगमे, तत्प्रयोजनस्यापि गवे-

* 'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता चिरम् ॥
विदधदीदृशमेव सदा सखे ! सुखित मास्स्व ततः शरदांशतम् ॥'

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षणायां, तत्प्रतीत्यर्थमपि लक्षणायाएवोपगमेऽनवस्थाप्रसङ्ग इति शैत्यादिप्रतीतीनां प्रयोजनीभूतानां जनकतया व्यञ्जनाऽवश्यमङ्गीकार्या ।

मुख्यार्थबाधस्य क्वचित् सम्भवेऽपि न सर्वत्र सम्भवः । एवं शक्यसम्बन्धरूपाया लक्षणाया नैकत्वं, सम्बन्धानामनेकत्वात्, तीरे सामीप्यस्य शैत्यादौच तदन्यस्यैव कस्यचिद्वाच्यतयाऽनन्तसम्बन्धानां शाब्दबोधप्रयोजकत्वोपगमापेक्षयैकस्या एव व्यञ्जनाया स्तत्त्वे लाघवम् ।

एवं शक्यप्रतियोगिकानियतसम्बन्धवान् न लक्षणाप्रतिपाद्यः । यत्रापि द्विरेफपदादौ लक्षितलक्षणा प्राचीनैः स्वीकृता, तत्रापि तद्वाच्यस्य रेफद्वयादिमतो भ्रमरादिपदस्य भ्रमरादौ वाच्यवाचकभावः सम्बन्धो नियतएव । व्यङ्ग्यार्थस्तु प्रकरणादिवशेन नियतसम्बन्धोऽनियतसम्बन्धो वाच्यार्थेन सम्बद्धेन सम्बद्धश्च । उदाहरणानि च विस्तरभयान्नेह दर्शितानि । तथाऽपि प्रथमस्य— 'अत्ता एत्थ' इति । तत्रपथिकैकविषयतया तस्यनियतत्वम् । 'कस्स व ण होइ' इति द्वितीयस्य । तत्रसखीकान्तादिप्रतिपाद्यभेदेनार्थभेदस्य दर्शितत्वात् । तृतीयस्य— 'विपरीअरए लच्छी*' इति । तत्र हरिपदेन दक्षिणनयनस्य सूर्यात्मकत्वात् तन्निमीलनेन सूर्यास्तमयस्य, तेन पद्मसङ्कोचस्य, ततोब्रह्मणः स्थगनस्य, तस्मिन् सति तेनगोपनीयाङ्गादर्शनेननिराबाधं निधुवनक्रीडेति पूर्वपूर्वेभ्योऽर्थेभ्यः सम्बद्धाना मुत्तरोत्तरेषां प्रतीतेर्दिङ्मात्रमुदाहरणं

*'विपरीअरए लच्छी बम्हं दट्ठूण णाहिकमलट्ठम् ॥
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ ॥'
'विपरीतरते लक्ष्मी ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ॥
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ॥' इतिच्छाया ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

किञ्च 'ज्ञानस्य* विषयोह्यन्यः फलमन्यदुदाहृतम्' इत्युक्तदिशा ज्ञाननिरूपितविषयतावतो घटादेर्ज्ञानातिरिक्तावज्ज्ञाननिरूपितप्रयोजनत्ववतोऽप्यनुव्यवसायादेर्ज्ञानातिरिक्तत्वमेव सर्वत्र दृष्टमिति लक्ष्यार्थतीरादिबोधप्रयोजनशैत्यादिविशिष्टतीरादेर्गङ्गादिपदलक्ष्यत्वे तादृशविशिष्टस्यैव शाब्दबोधे लक्ष्यार्थज्ञानस्य स्वनिरूपितप्रयोजनत्ववद्व्यङ्ग्यार्थविशिष्टविषयकतया प्रयोजनेन सहाभेदप्रसङ्गः सर्वानुभवविरुद्ध आपद्येत।

किञ्च व्यञ्जनायाः पदश्रवणसमनन्तर मप्रसरादभिधालक्षणाज्ञानाधीनाभिधेयलक्ष्यार्थबोधानन्तरमेव च प्रसरात् तस्याः शक्तिलक्षणाभ्यां सह कार्यकारणभावसम्बन्धस्य सत्त्वात् कथं तत्स्वरूपत्वं तस्याः। कार्यकारणयो र्भेदवादि†-मतेऽभेदवादि‡मतेऽपि समवायिकारणेन सहैव कार्यस्याभेदोपगमो, न तु निमित्तकारणेन सहेति निमित्तकारणीभूताभिधाऽऽदिना सह तस्यासम्भव एव। न च केवलामभिधां लक्षणां वा तदन्यतरद्वोपजीव्य व्यञ्जना प्रसरति, तदन्यतराभाववद्वर्णमात्रस्यापि रसादिव्यञ्जकतायाः, नायिकाविकसन्नेत्रत्रिभागालोकनेऽनया कटाक्षेणाभिलाषो व्यञ्जित इतिसहृदयप्रतीतिदर्शनेन चेष्टाऽऽदीना मप्यभिलाषादिव्यञ्जकतायाः, इदं पदं नैतदर्थस्य वाचकं न लक्षकं, किन्तु व्यञ्जकमितिप्रामाणिकप्रयोगस्य च दर्शनादभिधाऽऽदिविजातीयं व्यञ्जनाऽऽद्यभिधमवश्यमेवार्थबोधकमुपगन्तव्यम्।

एवं वाच्याद्यर्थस्य बाधनिश्चयसत्त्वे योग्यताज्ञानाभावान्न तस्यान्वयबोध। वैयञ्जनिकबोधे च बाधनिश्चयस्य प्रतिबन्ध-

*काव्यप्रकाशकारिकेयम्। †नैयायिकादिमते। ‡साङ्ख्यादिमते।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कत्वानभ्युपगमात् तत्प्रतिबध्यताऽवच्छेदककुक्षौ दोषविशेषाजन्यत्वादीनामिव व्यञ्जनाऽजन्यत्वमपि प्रविष्टम् । एवञ्च यदुक्तं तत्तत्पदज्ञानरूपोद्बोधकसहकारेण व्यङ्ग्यार्थानां स्मरणजनने मानस एव बोधो, नत्वन्वयबोधस्वरूपः, तत्र च पदपदार्थयोः सम्बन्धज्ञानमनपेक्षितमेवेति किमर्थं व्यञ्जनाऽभ्युपगम्येति । तदपिनिरस्तम् वेदितव्यम्, बाधनिश्चयकाले मानसबोधस्याप्यनुदयात् । व्यङ्ग्यत्वेनाभिमतत्तदर्थविषयकान्यत्त्वस्य प्रतिबध्यताऽवच्छेदकत्वं तादृशबोधे वैलक्षण्यानभ्युपगमेऽसम्भावितमेव । अन्यान्यमानसबोधविजातीयत्वेऽपि मानसत्वाभ्युपगमनिर्बन्धे च न व्यञ्जनावादिनामपिविवादः, विजातीयकारणजन्यविजातीयार्थबोध एव तेषां निर्बन्धात् । शाब्दबोधश्च बाधनिश्चयकाले वाच्याद्यर्थविषयकोऽप्याहार्य्य योग्यताज्ञानमादाय दार्शनिकै रभ्युपगतः, किमुत व्यङ्ग्यार्थविषयको यस्य बाधनिश्चयस्य प्रतिबन्धकत्वमपि नाङ्गीक्रियते ।

तदानीं वाच्याद्यर्थविषयकशाब्दबोधानुपगमे तु 'पुत्रादिनी त्वमसि पापे !' इत्याद्यभिशापवाक्यात् स्वस्मिन् पुत्रभक्षणकर्तृत्वाभावनिश्चयस्यावश्यं सत्त्वेन तादृशकर्तृत्वप्रकारकशाब्दबोधानुदये क्रोधाद्याविष्काराभावापत्तेः ।

अतएव विशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयत्वेन प्रतिबन्धकत्वेन सेके वह्निकरणकत्वाभावनिश्चयदशायां सेकोवह्निकरणक इतिबुद्धे र्वह्निना सिञ्चतीत्यादिवाक्यादनुत्पादे योग्यताज्ञानस्य शाब्दबोधकारणत्वाभ्युपगमोनिरर्थक इत्यपि समाहितम् । तथा सत्युक्तस्थले बाधनिश्चयस्यावश्यकतया शाब्दबोधानुपपत्तेः । एवञ्च बाधनिश्चयप्रतिबध्यताऽवच्छेदककुक्षौ शाब्दबोधातिरिक्तत्वं निवेशनीयम् ।

नच तदानीं योग्यताज्ञानस्यापि तत्रोत्पादासम्भवात्

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्कारणत्वोपगमेऽपि कथं तत्रशाब्दबोध इतिवाच्यम् । योग्यताज्ञानस्य भ्रमप्रमासाधारणयेनैव कारणत्वादाहार्यरूपस्यतस्य तदानीमपि सम्भवाद्, बाधकालिकत्वे सतीच्छाजन्यज्ञानस्यैवाहार्यत्वात् । पदज्ञानादिसत्त्वे व्यङ्ग्यार्थबोधस्योत्पत्तेः, तदसत्त्वेऽनुत्पत्तेश्च तस्य शाब्दत्वस्यावश्याभ्युपेयत्वात् । एवं सतीदृशरीत्यैव सर्वत्र पदज्ञानमुद्बोधकमवाप्य स्मरणेन मानसस्य विशिष्टबोधस्य सम्भवात् सङ्केतलक्षणयोरप्यनभ्युपगमसम्भवाच्च ।

व्यञ्जनायाश्च स्वरूपसत्या एव तत्तदर्थबोधकारणतया तत्तदर्थानां व्यञ्जनायाश्चानुपस्थितावपि न तेषां बोधानुपपत्तिः।

नचैवमेकपदव्यङ्ग्याना मनेकेषामप्यर्थाना मेकस्य सर्वदा बोधः स्यादितिवाच्यम् , स्वरूपसत्या स्तस्या वक्तृबोद्धव्यादिवैलक्षण्यज्ञानसहकारेणैव कार्यजनकत्वात् । स्वरूपसत्त्वं च तस्याः प्रागेवदर्शितम् ।

नचैवमपि येषां सहकारित्वं कल्पनीयम् , तावन्मात्रस्यैव कारणत्वमस्तु, कृतंव्यञ्जनयेतिवाच्यम्, सत्यपि वक्त्राद्यौचित्यवैलक्षण्यादिज्ञानेऽनुरक्तपुरुषोच्चारितवाक्यघटकौजोगुणव्यञ्जकवर्णानाम्— 'योग आद्यतृतीयाभ्यामन्त्ययो* रेणतुल्ययोः' इत्याद्युक्तानां सङ्घटनातो माधुर्यानभिव्यक्तेः ।

व्यञ्जनोपगमे तु तेषामोजोगुणव्यञ्जकानां माधुर्ये प्रतिकूलत्वात् तद्व्यञ्जकत्वाभावान्न तेभ्यो माधुर्याभिव्यक्तिः ।

गूढव्यङ्ग्यार्थबोधे काव्यभावनापरिपक्वबुद्धेरपि प्रयोजकत्वाद्विकसितादिपदेभ्यो गूढव्यङ्ग्य-लोकोत्तररमणीयत्वादीनां सहृदयमात्रस्यैव बोधः । अगूढव्यङ्ग्यबोधस्तु सहृदयासहृदयसाधारणयेनैवोदेत्यत स्तत्रनोक्तबुद्धेः प्रयोजकत्वम् ।

* 'टादिःशषौ वृत्तिदैर्घ्यं गुम्फउद्धतओजसि ॥' इतिप्रकाशोक्तउत्तरावयवः ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अतएव 'श्रीपरिचयाज्जड़ा† अपि' इत्यादावुपदिशते मुख्यार्थस्य शब्दकरणकं यत्पूर्वकालिकज्ञानाविषयविषयकं ज्ञानं, तदनुकूलव्यापारस्य कर्तृत्वं वक्तृधर्मत्वेनाचेतने यौवनमदे बाधितम्, अतः शब्दकरणत्वांशत्यागेन व्याप्यव्यापकभावसम्बन्धेन तादृशार्थस्य लक्षणया बोधे— 'सुकुमारतयाऽङ्गानां‡ विन्यासो ललितंभवेत्' इतिलक्षणलक्षितललितज्ञानेऽनायाससाध्यत्वस्य व्यङ्ग्यस्य सहृदयासहृदयवेदनीयत्वप्रयोजनकस्य सहृदयेतरैरपि वेद्यत्वमित्युक्तं काव्यप्रदीपादौ ।

एवमनुमित्याऽपि§ पूर्वोक्तया तत्रतत्र न तेषामर्थानां बोधसम्भवः । तथाहि यदुक्तम्-- 'दृष्टिं हेप्रतिवेशिनि !' इत्यत्र 'इयम्' इत्याद्यनुमाऽऽकारः । तत्रपतिव्रतायाः पत्यनुरक्ताया वा तदभिमतस्रोतोजलानयनकरणसम्भवा न्नलग्रन्थिजन्यस्तनविलेखनादिविशेषवत्त्वहेतो स्तत्र सत्त्वात्, साध्यस्यच पतीतरकर्तृकभोगकर्मत्वस्याभावाद् व्यभिचाराद् व्याप्तिज्ञानकारणीभूतव्यभिचारज्ञानाभावस्य तादृशज्ञानदशाया मभावेनानुमितेरसम्भवात् ।

एवं 'भम धम्मिअ' इत्यत्रानुमानं तावत्— 'इदं गोदावरीतीरनिकुञ्जं श्वप्रयोज्यानिष्टसम्भावनावत्पुरुषप्रतियोगिकसय्योँगनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नकार्यतानिरूपितताद्रात्म्यसम्बन्धावच्छिन्नकारणताऽवच्छेदकधर्माभाववत्, सिंहवत्त्वप्रकारकनिश्चयविशेष्यत्वात्, यन्नैवं, तन्नैवम्' इत्याकारकमेव वाच्यम् । व्याप्तिग्रहश्च— 'यद्यच्छ्वप्रयोज्यानिष्टसम्भावनावत्पुरुषप्रतियोगिकसय्योँगनिष्ठावच्छेदकत्वसम्बन्धाव-

† श्रीपरिचयाज्जड़ाअपि भवन्त्यभिज्ञा विदग्धचरितानाम् ॥
उपदिशति कामिनीनां यौवनमदएव ललितानि ॥'

‡ साहित्यदर्पणोक्तमिदंलक्षणम् । § महिमभट्टमतमुपक्रम्यखण्डयति ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

च्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकधर्माभाववत्, तत्तत्तादृशपुरुषविशिष्टनिश्चयविषयताऽवच्छेदकधर्मावच्छिन्नसामान्याभावप्रकारकनिश्चयविशेष्यम्, यथा गृहादिकम्' इतिरीत्या ।

उक्तसाध्ये तादृशनिश्चयविशेष्यत्वव्यापकत्वनिश्चये, सिंहे स्वानिष्टप्रयोजकत्वनिश्चयवतो गोदावरीतीरनिकुञ्जे तादृशनिश्चयविशेष्यत्वज्ञाने तादृशसामान्याभावनिश्चयस्यासम्भवाद् व्यापकाभावेन व्याप्याभावरूप-तादृशकारणताऽवच्छेदकधर्माभावस्यानुमितिः । निश्चये पुरुषवैशिष्ट्यम्— स्वसमवेतत्व – स्वसमवेतानिष्टप्रयोजकत्वप्रकारताकत्वोभयसम्बन्धेन बोध्यम् । तेनान्यपुरुषीयानिष्टनिश्चयावादाय न व्यापकत्वहानिः ।

तत्रावीरस्य भीरोरपि प्रभुनियोगेन गुरोराज्ञया स्वानुरक्तजनप्रातिसम्भावनया धनादिलाभाशया च स्वानिष्टप्रयोजकत्वेन निश्चितसिंहादिमद्देशे भ्रमणदर्शनादुक्तसामान्यव्याप्तौ व्यभिचारः ।

वीरस्वभावस्य च स्पर्शादिजन्यपापोत्पत्तिप्रयोजकत्वेन निश्चिताच्छुनो बिभ्यतोऽपि निजभुजविक्रमख्यापनकुतूहलिनो मृगयाऽर्थसिंहवद्देशे भ्रमणदर्शनादेव व्यभिचारः ।

सिंहवत्त्वप्रकारकनिश्चयश्च गोदावरीनिकुञ्जे तादृशासतीवाक्यादेवजातः, तस्याश्चानाप्ततया तदुच्चारितवाक्यस्यानाप्तोक्तत्वादप्रमाणत्वेन निश्चय इत्यप्रामाण्यज्ञानानास्कन्दितपरामर्शासम्भवा न्नानुमितेः सम्भवः ।

'निश्शेषच्युत'— इत्यत्र च चन्दनच्यवनादीनां स्नानजन्यत्वस्यापिसम्भवात् सुरतेच्छाप्रयोज्यनायकसमीपगमनकर्तृत्वव्याप्तत्वाभावेन नोक्तहेतुनोक्तसाध्यानुमितिः सम्भवति ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वैयञ्जनिकबोधे तु वयाप्त्यादिनिश्चयस्याप्रयोजकतया सम्भावनाविषयीभूतार्थमात्रादेवाभिमतबोधो व्यञ्जनावादे स्वीकृत इति न तन्मते पूर्वोक्तानुपपत्तिः ।

'निश्शेष*—' इत्यत्र चाधमपदसहायानामेव वाप्यधिकरणकस्नानकार्यत्वेनोपात्तानां चन्दनच्यवनादीनां तादृशार्थाभिव्यञ्जकत्वम् । तथाहि—'निश्शेष–' इत्यादिवक्त्र्या नायिकाया अतिचतुराया अस्या वाचोयुक्त्या स्तात्पर्यं गूढमेव भवितुमर्हतीतिस्नानकार्यत्वेनोपात्तचन्दनच्यवनादिष्वर्थेष्वभिधया वृत्त्या तत्तत्पदेभ्योऽवगतेषु, 'अधमस्य' इत्यत्रापकृष्टकुलप्रसूतोऽपकृष्टकर्मकर्ता वाऽधमपदार्थः । तत्राद्यस्योत्तमनायिकाया नायके नीचकुलप्रसूतत्वख्यापनासम्भवादत्र विवक्षितु मशक्यतया द्वितीयएव विवक्षितः, तद्घटकस्य कर्मण स्तादृशकर्मत्वेन सामान्यरूपेणावगमेऽपि साम्प्रतिकदूतीसम्भोगातिरिक्ताना मपकृष्टकर्तृत्वस्यैतत्पूर्वं नायके निश्चये, तस्मिन्ननुरागातिशयस्यावश्यं भङ्गात् तत्कार्यस्य स्वयंदूतीप्रेषणस्यानुपपत्ति रितीदानीन्तनमेव दूतीसम्भोगरूपं निन्दितकर्मादाय तदाचरणकर्तृतायामेवाधमपदव्यञ्जना पर्यवस्यतीतिस्नानकार्यतयोपनिबद्धानामपि चन्दनच्यवनादीनां सम्भोगकार्यत्वस्यापि सम्भवाद् योग्यतया सम्भोगाङ्गभूताश्लेषचुम्बनादिकार्यत्वप्रतिसन्धाने सति तद्व्यञ्जनद्वारा सम्भोगव्यञ्जकत्वं तेषा मिति ।

नचानुमिते रप्यधमपद्वसहकृतोक्तहेतुनैववाच्यतया नोक्तव्यभिचारइतिवाच्यम्, अधमत्वस्य प्रमाणान्तरेणनिर्णयाद्धेतोः सन्दिग्धासिद्धत्वस्य तथाऽपि दुर्वारत्वात् ।

* 'निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो, नेत्रे दूरमनञ्जने पुलकिता तन्वा तवेयं तनुः ॥ मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमे ! वापींस्नातुमितोगताऽसि नपुनस्तस्याधमस्यान्तिकम् ॥'

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एवं रसादिप्रतीतीनां विभावादिप्रतीत्यनन्तरमेव जायमानत्वात् 'पूर्ववच्छेषवत् सामान्यतोदृष्टश्च' इतिन्यायसूत्रोक्तत्रिविधानुमानान्तर्गत-कारणलिङ्गककार्यानुमानादेव सम्भवो यथा— 'अयं रत्यादिज्ञानरूपरसवान्, विभावादिज्ञानवत्त्वान्मद्वत्' इति ।

न च सामान्यतो विभावादिज्ञानवत्त्वस्य रसविधेयकानुमितिजनकत्वे कार्यधूमादिलिङ्गककारणवह्निविधेयकपर्वतोद्देश्यकानुमितिवत् तस्या अप्यचमत्कारित्वप्रसङ्ग इतिवाच्यम् । वक्ष्यमाणप्रकारिकाया अनुमिते र्वह्न्याद्यनुमितिविजातीयतया चमत्काराधायकत्वसम्भवात् । तथाहि— नलत्वादिमति तत्प्रकारकप्रमातः, ज्ञानानां प्रामाण्यं स्वग्राहकयावत्सामग्रीमात्रजन्यज्ञानविषयत्वादिरूपस्वतोग्राह्यवदितिमते बाधनिश्चयोदयं यावत् सर्वेषां ज्ञानानां प्रमात्वमेवेत्युत्तरकाले बाधनिश्चयाभावादप्रमात, नलत्व-तदभावादिरूपविरुद्धकोटिद्वयस्यानवगाहनात् संशयतः, सादृश्यविषयताकत्वाभावात् सादृश्यप्रतीतितश्च विलक्षणया, भित्त्यादिलिखितहस्त्यादिशरीराकारसदृशाकारे चित्रे, वस्तुतो गजत्वाद्यभाववत्यपि गजोऽयमित्याकारकप्रतीतिसदृशया, नलत्वादेर्वस्तुतोनटेऽभावेऽपीदन्त्वेन तत्र नलत्वमवगाहमानया, ज्ञानानां परतः प्रामाण्यवादे भ्रमरूपयैव नलोऽयमित्याद्याकारिकया प्रतीत्या विषयीकृतस्य नटस्य, दमयन्त्याद्यात्मकालम्बनविभावचन्द्रोदयाद्युद्दीपनविभाव-तदनुकूलरोमाञ्चाद्यनुभावोत्कण्ठाऽऽदिव्यभिचारिभावसम्बन्धविरहेऽपि, 'सेयं ममाङ्गेषु*' इत्यादिकाव्यजन्यस्येच्छाऽऽदिवशेन पुनःपुनर्जायमानत्वात् प्रत्यक्षस्येव कविविवक्षितार्थ-

* 'सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ॥
मनोरथश्री र्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥'

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयकबोधस्य सहकारेण, गुरुकर्तृकतत्तदभिनयोपदेश-पुनःपुनस्तदनुशीलनोभयजनितनलाद्यभिनयप्रकाशनेन, नटे तादृशालम्बनादिविभावप्रतीतौ, तदनुकूलरोमाञ्चादेः प्रत्यक्षेणोत्कण्ठाऽऽदेः श्रान्तरधर्मस्य प्रत्यक्षासम्भवेऽपि तत्कार्यस्य बाह्यविषयासय्युँक्तदृष्टिमत्त्वादेः प्रत्यक्षसम्भवात् तल्लिङ्गकानुमित्या, नटेऽवगमसम्भवा 'नलोऽयं दमयन्तीविषयकरतिमान् निरुक्तालम्बनादिविभावादिसम्बन्धित्वाद्, यो यदात्मकालम्बनविभाववत्त्वे सत्यनुभावव्यभिचारिभावसम्बन्धवान्, स तद्रतिमान्' इतिसामान्यतो यत्तद्द्वयां व्याप्तिनिश्चयस्य स्वस्मिन्नेव सपक्षीभूते सम्भवादनुमितिः सामाजिकस्य ।

नच तादृशहेतुमत्त्वस्य वस्तुतोनटेऽविद्यमानस्य बाधनिश्चयकाले कथमुक्तानुमितिः, तत्कारणीभूतस्य परामर्शस्य तदानीमसम्भवादितिवाच्यम् ।

धूलीपटलादौ वस्तुतोऽसतोऽपि धूमत्वस्य, कुज्झटिकाव्याप्ते देशेऽसतोऽपि धूमस्य, धूमे तद्देशेवा बाधनिश्चयाभावकाले भ्रमाद्वह्न्यनुमितिरिव प्रकृतेऽपि वस्तुतो नलभिन्नेऽपि तत्तदालम्बनादिशून्येऽपि नटे तेषां बाधनिश्चयविरहदशायामेवानुमितिसम्भवात् ।

नच प्रकृतसाधनताऽवच्छेदकावच्छिन्नविशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेदकावच्छिन्ननिरूपितव्याप्तिप्रकारताशालिनिश्चयस्यैव प्रकृतसाध्यताऽवच्छेदकावच्छिन्नविधेयताकानुमितौ कारणत्वात्, तस्यच प्रकृतसाध्यसाधनयो र्व्यभिचारज्ञानाभाव-सहचारज्ञानयोरेव जन्यतया प्रथमस्य कथञ्चित् सम्भवेऽपि, द्वितीयस्य तादृशसाधनताऽवच्छेदकावच्छिन्ने दमयन्त्यादिविषयकरतिमत्त्वावच्छिन्नसाध्यसामानाधिकरण्य-निश्चयरूपस्याभावात् कथमुक्तानुमिति रितिवाच्यम् ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तथात्वेऽपि तत्साध्यतानिरूपितस्वविधेयताकानुमिति-प्रयोजकोदाहरणघटकद्विरुक्तयत्पदतात्पर्यविषयत्वरूपस्वसाजात्यस्य स्वकीयनायिकाऽऽदिविषयकरत्यादौ सत्त्वेन तत्सामानाधिकरण्यस्य प्रकृतसाधननिरूपितस्वलिङ्गकानुमितिप्रयोजकोदाहरणघटकद्विरुक्तयत्पदतात्पर्यविषयत्वरूपसाजात्यवति स्वकीयनायिकाऽऽद्यालम्बनविभावादिसम्बन्धित्वे स्वान्तर्भावेणैव निश्चयात् तेनैव प्रकृतसाध्यसाधनयो र्व्याप्तिनिश्चयस्य सम्भवात् ।

स्वसजातीये स्वसजातीयसामानाधिकरण्यनिश्चयस्यापि स्वनिरूपितव्याप्तिनिश्चयजनकताया आवश्यकत्वात् । अन्यथा बालकस्य 'स्तन्यपानं मदिष्टसाधनं मत्कृतिसाध्यं च' इति स्वस्यज्ञानोत्तरमेव स्तन्यपाने प्रवृत्तेः 'यो यत्साध्यकप्रवृत्तिमान्, स तद्विशेष्यकेष्टसाधनत्वादिज्ञानवान्' इति यत्तद्भ्यां सामान्यतो व्याप्तिमवधार्य प्रयोजकवृद्धप्रयुक्त-'गामानय' इत्यादिवाक्यजबोधोत्तरकालिकप्रयोज्यवृद्धसमवेतगवानयनादिसाध्यकप्रवृत्तिज्ञानजन्यतत्समवेतगवानयनादिविशेष्यकेष्टसाधनत्वकृतिसाध्यत्वप्रकारकज्ञानविधेयकानुमितेः 'अयं गवानयनादिविशेष्यकेष्टसाधनत्वज्ञानवान्, तत्साध्यक-प्रवृत्तिमत्त्वात्' इत्याकारायाः सर्वानुभवसिद्धायाः प्रकृतसाध्यसाधनयोः सामानाधिकरण्यज्ञानव्यतिरेकेणापि जायमानाया अनुपपत्तेः ।

एवञ्चोक्तानुमितेः काव्याद्यर्थविषयकभावनाविषयविभावादिमूलकतया मुहुर्मुहु रिच्छाविषयीभूतास्वादविषयत्वेन तादृशानुमितिविषयकधाराबाहिकेच्छाबलात् तादृशानुमितिधारारूपाया श्चर्वणायाः सम्भवादेकतद्विषयकज्ञानोत्तरं तद्विधेयकानुमिते रुत्पादेऽपेक्षणीयायाः सिसाधयिषाविरहविशिष्ट-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सिद्ध्यभावरूपायाः पक्षतायाः सत्त्वाद् विलक्षणचमत्कारजनकत्वं लोके च प्रत्यक्षादिना गृहीतै र्विभावादिभि र्धूमादिभिर्वा लिङ्गै र्जायमानाया रत्याद्यनुमिते र्वह्न्याद्यनुमितेर्वा तादृशविभावादिविषयकविलक्षणज्ञानाद्यजन्यतयोक्तचर्वणाविरहेण च न तथाविधचमत्कारजनकत्वम् ।

तादृशचर्वणाविशिष्टरत्यादे रसस्य सामाजिकादावसत्त्वेऽपि तादृशानुमितिधारारूपाया श्चर्वणाया स्तद्विशेषणीभूताया स्तत्रसत्त्वादेव सामाजिकादीनां रसवत्त्वव्यवहार औपचारिकः ।

अथवा स्वीयनायिकाऽऽदिविषयकरत्यादे स्तदानी मसतोऽपि तज्जन्यसंस्काररूपवासनायाः सत्त्वेन तद्विषयीभूतरत्यादिना दमयन्त्यादिविषयकरत्यादे र्भेदस्यागृह्यमाणतया च सामाजिकानां तादृशरसे स्वनिष्ठत्वव्यवहार इत्यपि केनचिदुक्त मनादेयमेव ।

नटे सामाजिकादौ च दमयन्त्यादिविषयकरत्यभावस्य स्वीयनायिकाविषयकरतिभेदस्य वा, तद्रतौ विभावादिषु वा, नलादिवृत्तिषु स्ववृत्तित्वस्य निश्चये बाधहेत्वसिद्ध्यादिदोषग्रासात्, तादृशरसस्य सामाजिकाद्यवृत्तित्वेनाचमत्कारित्वप्रङ्गाच्च ।

व्यञ्जनावादे चोक्तसूत्रस्य विभावादिभिः समं स्थायिनां व्यङ्ग्यव्यञ्जकभावस्वरूपसम्बन्धात् सम्मेलनाद्वा रसस्य निष्पत्तिरभिव्यक्तिरित्यर्थकतया, कारणेन कार्यस्य, कार्येण च कारणस्यानुमाने पक्षसत्त्वसपक्षसत्त्वादिपञ्चकस्वरूपगमकतौपयिकधर्माणां वारंवार मनुशीलनरूपपाटववतां सामाजिकानां रतिकारणादिनायिकाऽऽद्यालम्बनविभावादीनां रत्यादिभिः-समं तादृशसम्बन्धेन व्याप्यव्यापकभावज्ञानादनुमिताया रतेः

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संस्कारापरपर्यायवासनाविषयतयाऽन्तर्वृत्तित्वे गुरुशिक्षाऽभ्यासादिना काव्यघटकपदेभ्यो, नाट्ये चाहार्यनलादिव्यञ्जकवेषविशेषेभ्य स्तत्तदर्थोपस्थित्या तेषां नलदमयन्त्यादिव्यक्तिविशेषसम्बन्धित्वविशिष्टरतिकारणदमयन्त्यादिविषयकस्यैवान्वयबोधस्य जातत्वेऽपि, नलादौ स्वीयत्व-रिपुत्वौ-दासीनत्वानां ज्ञाने तत्सम्बन्धित्वेन प्रतीतानां विभावादीनां त्रपाऽऽदिमात्रजनकतया रसानास्वादकत्वा न्निरुक्तविषयताप्रापकत्वादिरूपविभावनादिव्यापारवतां लौकिकसुखदुःखकारणानां तदुभयजनकतया सुखमात्रजनकत्वादलौकिकानां तेषां नलादिव्यक्तिविशेषसम्बन्धांशपरिहारेण रतित्वसामान्यावच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकीभूतकामिनीत्वसामान्यप्रकारताकप्रतीते र्व्यञ्जनाव्यापारसाध्याया विशेष्यीभूतानां बलादेव पूर्वकालिकी सामाजिकहृदयावस्थिता रति र्व्यञ्जनयैवाभिव्यज्यते ।

अतएव येषां कदाचिदपि रतिर्नानुभवविषयीभूता, तेषां न तदभिव्यक्तिः । शृङ्गारिणामेव शृङ्गारस्य, निर्विण्णस्वभावानामेव शान्तस्याभिव्यक्तिः । तत्रापि काव्यव्युत्पत्त्यादिजन्यवासनाया अपि तदभिव्यक्तौ कारणतया न तद्रहितानां सेति ।

तदुक्तम्*-- 'वासनाचेन्न हेतुः स्यात् स स्यान्मीमांसकादिषु' इति ।

नलादिव्यक्तिविशेषसम्बन्धित्वेन प्रतीताया रतेः स्वस्मिन्नसत्त्वात् स्ववृत्तेश्च तस्या नलादिसम्बन्धविरहात् कथमुक्ता रसाभिव्यक्तिरिति तु न वाच्यम् ।

'एते विभावादयो मदन्यनिरूपितसम्बन्धाभाववत्त्वे स-

* प्रदीपादौ ।

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ति, मन्निरूपितसम्बन्धवन्तः' एवं 'मन्निरूपितशत्रुत्ववदन्य-निरूपिते' त्याद्याकारकस्य स्वरिपूदासीनरूपसम्बन्धिविशेष-निरूपितान्ययोगव्यवच्छिन्नस्वत्वसम्बन्धतदभावयो र्विभावा-दिविषये निश्चयस्याभावाद्, दमयन्त्यादौ काव्यजन्यबोधीय-भीमनलादिभिन्ननिरूपितसम्बन्धाभाववत्त्वनिश्चयस्य सत्त्वाच्च। स्वनिरूपितस्वत्वादिप्रकारकदमयन्त्यादिविशेष्यकनिश्चयस्यास-त्त्वेऽपि, तद्विरोधिन स्तादृशस्वत्वाभावप्रकारकनिश्चयस्याप्यस-त्त्वात् स्वस्मिन् स्वीयत्त्वज्ञानकार्यस्य तद्विषयकरत्यादिमत्त्व-निश्चयस्य काव्यादिजन्यस्य पूर्वाननुभूतचैत्रादेः शाब्दबोधे विषयताया अन्यथाऽनुपपत्त्याऽसंसर्गाग्रहरूपयोग्यतामात्र-स्यैव तदीयविषयताप्रयोजकत्वस्य तत्रतत्र सिद्धान्तितत्तया स्वस्मिन्नुत्पत्तिसम्भवात्।

अथ विभावयन्ति रत्यादीनीपद्रसाभिव्यक्तियोग्यतां नयन्तीत्यादिपूर्वोक्तव्युत्पत्तिभी रत्यास्वादाङ्कुरयोग्यताऽऽ-दिप्रयोजकादेरेव विभावादिपदवाच्यतयाऽन्यनायिकाज्ञान-स्यान्यविषयकरत्याद्युद्बोधकत्वासम्भवेन नायिकाऽऽदिस्वरूप-विभावादीना मुक्तरीत्या कामिनीत्वादिसाधारणधर्मेण निश्चय-स्य सम्भवेऽपि तत्तदात्ममात्रवृत्तिरत्यादेः सकलसामाजिक-वृत्तित्वरूपसाधारण्यस्याभ्युपगमे स्वनायिकाविषयकरत्यादे-रपि स्वमात्रनिष्ठत्वाभावप्रसङ्गः।

स्वगतत्वेनैव पूर्वावस्थितरत्यादे रुद्बोधे समीपस्थगुरु-जनादिप्रयुक्तव्रीड़ाऽऽतङ्कादेरपि प्रसङ्ग इतिचेत्। न, दमय-न्त्यादिविभावादीनां साधारण्यप्रतीतौ सत्यां रसाभिव्यक्तिका-ले तद्विषयकरत्यादौ नलादिनिष्ठत्वरयोक्तसाधारणप्रतीतिब-लादेवाज्ञाने कामिनीविषयकरतित्वसामान्येन तादृशरतीतरनि-ष्ठविषयताशून्यया तादृशरत्यवच्छिन्नचैतन्याभिव्यक्तया चर्वण-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

या रति र्विषयीक्रियत इत्यभ्युपगमात् ।

तादृशविशिष्टस्य रसरूपत्वादेव च विशेषणस्य चर्वणाया नाशे 'विनष्टोरसः' इतिप्रतीतिः । स्थायिनो रत्यादेरन्यदाऽपि सत्त्वेऽपि न रसप्रतीतिः, विशेषणीभूताया अभिव्यक्तेस्तदानीमभावात् । विशेष्यसत्ताया गुणादौ सत्त्वेऽपि विशेषणगुणान्यत्वादे रभावाद् गुणकर्मान्यत्वविशिष्टसत्ताऽऽदे र्गुणादावप्रतीतिरिव ।

एवञ्च प्रथमं काव्यपदादिभ्य स्तत्तदर्थोपस्थितौ तत्तन्नायिकाऽऽदिविभावादिविषयके बोधे जाते, पूर्वानुभूतरत्यादिवासनावतः सहृदयसामाजिकस्योक्तकामिनीत्वादिसाधारणधर्मेण ज्ञानम्, तेनचोक्तकामिनीत्वविशिष्टविषयकरतित्वसामान्येनैव विभावादिसमूहालम्बनात्मकप्रतीतिविषयरत्याद्यवच्छिन्नतत्तद्लौकिकसाक्षात्कारप्रतीतिप्रतिबन्धकसंसर्गाभाव--प्रयोज्यप्रकाशविषयचिदानन्दविषयो विभावादिसब्वँलितो रसो व्यञ्जनाव्यापारेणैवाभिव्यज्यते । विभावादिविषयकसमूहालम्बनज्ञानीयमुख्यविशेष्यतारूपस्य तत्सब्वँलितत्वस्य ततोऽपगमेऽपि, घटपटादिसमूहालम्बनवन्न तत्प्रतीतीयमुख्यविशेष्यता विभावादीनाम्, किन्तु कर्पूरमरिचजीरकधान्याकसिताऽऽदीना मत्यन्तसंश्लेषात् पानकरसे कर्पूरादिसब्वँलितस्यैव मरिचादीनां रसानुभववद् विभावादीनां रत्यादिभिः समं मिथोव्याप्यव्यापकभावसम्बन्धादन्योऽन्योपस्कारकत्वात् तदेकप्रतीते रपरप्रतीतिसापेक्षत्वाच्चैकसब्वँलितस्यैवापरस्य भाना न्मुख्यविशेष्यताया ऐक्यमेव ।

नच तर्हि विभावादिनिश्चयसत्त्वे रससत्त्वस्य, तदभावे रसाभावस्य च सत्त्वाद् विभावादिनिश्चयकार्यत्वमेव रसस्यापन्नमिति विभावादिसमूहालम्बनज्ञानजन्यसुखविशेषो रसः त-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्य चोत्पत्तौ व्यञ्जनाया अपेक्षणीयत्वमेवेत्येतावानायासो व्यर्थ इतिवाच्यम् ।

गुणात्मकविभावादिज्ञानस्य समवायिकारणत्वस्य, तादृशरसस्य वस्तुतः सामाजिकाद्यवृत्तितया, समवायिकारणनिरूपित–समवाय-स्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नवृत्तितावत्त्वविशिष्टकारणत्वरूपस्यासमवायिकारणत्वस्यापि तत्रासम्भवात्, तदुभयभिन्नकारणत्वरूपं निमित्तकारणत्वमेव तस्यवक्तव्यम्, तदपि कार्यनाशंप्रतिसमवायिकारणनाशस्य कारणताया अनुभूतचरत्वाद् विभावादिनाशेऽपि रसोद्बोधसम्भवात् तस्यविभावादिजीवितावधित्वं सकलसहृदयसाक्षिकं विहन्तीतिनोपगन्तुं शक्यम् । सुखसाक्षात्कारसामग्र्याश्च सुखेतरभानप्रतिबन्धकतया तादृशसुखात्मकरसज्ञानकाले विभावादिज्ञानस्यासम्भवादेव कार्यसहभावेनापि तस्य कारणत्वस्य वक्तुमशक्यत्वात् ।

द्वित्वादिसङ्ख्यां प्रत्यपेक्षाबुद्धे र्निमित्तकारणत्वस्य तन्नाशे द्वित्वादिनाशस्य च—

'अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः' इति विश्वनाथपञ्चाननेन, आदाविन्द्रियसन्निकर्ष—' इत्यादिनोदयनाचार्यचरणैश्च, सिद्धान्तितत्वेऽपि, तत्रद्वित्वप्रत्यक्षं प्रत्येवापेक्षाबुद्धेः कारणत्वम्, नतु द्वित्वंप्रत्यपीत्यस्यैवान्यै र्व्यवस्थापनात्। नायिकाऽऽलिङ्गनादिना निमित्तकारणभूतेन जनितस्य सुखस्यापिस्वोत्तरवर्तिविशेषगुणान्तरस्य साक्षात्कारादेव नाशो, नतु तदालिङ्गनादिनाशात् ।

तस्याभावे कारणाभावादेवोत्तरत्र तदनुत्पाद इति विषयान्तरसंसर्गसामान्याभाववत्या रसप्रतीतेः स्वोत्तरवर्तिनो विरोधिगुणान्तरस्याभावात् कथं तन्नाशः स्यादिति तस्यनो-

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्पन्नत्वमित्यस्यैव वाच्यतया कुत्र विभावादिज्ञानस्य कारणत्वम् ?, व्यक्तिवादेऽप्युक्तदोषाणां सद्भाव इति तु नैव वाच्यम् ।

उत्पत्तिविलक्षणाया एवाभिव्यक्ते र्व्यञ्जनाव्यापारसाध्याया उपगमेनान्यत्र दृष्टस्यात्रवैपरीत्यं लोकोत्तरत्वसाधकतया भूषणमेव न दूषणमित्यास्ताम् ॥

येतु केचिद्— यथावेदान्तिमते— 'सत्यंज्ञानमनन्तं ब्रह्म' 'तत्त्वमसि श्वेतकेतो ?' इत्यादिवाक्याद् विशेष्यविशेषणभावापन्नविशिष्टवाक्यार्थबोधस्य ब्रह्मभिन्नानामसत्त्वात् तत्तल्लक्षणलक्षितविशेष्यविशेषणभावस्य सर्वथाऽसम्भवात् सत्यत्वस्यापि ब्रह्मभिन्नस्योपगमे द्वैतापातात् तादृशाखिलवाक्यानामेव शुद्धब्रह्मलक्षकत्वम् । यथाचाखण्डस्फोटवादिमते 'गामानय' इत्यादिवाक्यानां गोकर्मकानयनादिरूपविशिष्टस्यैव वाचकत्वम्, तादृशविशिष्टार्थबोधजनकत्वरूपवृत्तिज्ञानादेव विशिष्टार्थस्योपस्थितावन्वयबोधो, नतु प्रत्येकपदवृत्तिज्ञानजन्या प्रत्येकपदार्थोपस्थितिरपि तादृशान्वयबोधजनिका तद्विलम्बेनान्वयबोधविलम्बे मानाभावात् । अतएव वस्नसादौ प्रकृतिप्रत्ययविभागस्यासत्त्वेऽपि तज्ज्ञानमात्रात्तदर्थयुष्मदादिसम्बन्धबोधः । तथैव प्रतीयमानत्वेनाभिमतानामप्यर्थानां तत्तदखण्डवाक्यनिरूपिताखण्डवृत्तिमत्तयैव तत्तद्विशिष्टवाक्येभ्यो बोधसम्भवादलं तदर्थमतिरिक्तवृत्तिकल्पनयेति वदन्ति ।

तेऽपि व्यवहारदशायामपि विशेष्यविशेषणभावादीनामनभ्युपगमे शक्यसम्बन्धरूपाया लक्षणाया अप्यसत्त्वादसतो यथाऽर्थस्य निश्चायकत्वासम्भवात् कथं लक्षणयाऽपि 'सत्या' दिवाक्येभ्यो ऽखण्डब्रह्मबोधः ? कथंवा विशिष्टवाक्यार्थस्य पूर्वं मननुभूतत्वे तत्तद्वाक्येभ्यः स्मरणम् ? विशेष्याज्ञाने

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्र वृत्तिज्ञानासम्भवाच्चेत्यादिदूषणैः प्रतिसमाधेयाः ।

यदपि 'कैलाशस्य प्रथमशिखरे' इत्यत्र भ्रमादेव श्रवणसमीपे शुण्डादण्डावर्त्तनं दिग्गजानामित्युक्तम् ।

तदपि नहि सर्वस्मिन्नेव सर्वेषां यथाकथञ्चिद् भ्रमः सम्भवति । तथासति 'आकाशो गर्दभः' इत्यपिभ्रमः स्यात् । किन्तु यत्पदार्थस्य यस्मिन् सादृश्यं, तत्रैव तस्यभ्रमः । यथा—रजतगतचाकचिक्यादिधर्मवत्तया तत्सदृशि शुक्तौ रजतभ्रमः । तन्न दूरत्वादिदोषवशात् तदसाधारणधर्माणामग्रहे तत्साधारणधर्मग्रहादेव तत्र तद्भ्रमः । तथाच कविप्रसिद्धिमात्रसिद्धस्वच्छसाकारत्वादिमत्याः कीर्तेर्वस्तुतस्तदभाववत्त्वेन विसिनीकाण्डसादृश्याभावात् कथं तत्र तस्यभ्रमःस्याद् येनाभिमतार्थबोधः सम्पद्येतेतिरीत्यैव निरसनीयम् ।

'भद्रात्मनः' इत्यादावप्राकरणिकार्थानां विशृङ्खलभावेन स्मरणमात्रेऽभिमतार्थासिद्धिः, तादृशस्मरणाद् विशिष्टविषयकस्यान्वयबोधविलक्षणस्य मानसस्योपगमे सर्वत्रैव तदुपगमसम्भवाद् विजातीयान्वयबोधस्य विलय एवापद्येत ।

'सुरभि मांसम्' इत्यादौ तत्तदसभ्यार्थानां विशृङ्खलस्मरणमेव हेयत्वप्रयोजकमित्यप्यनादेयमेव, गोमांसकर्मकभोजनकर्तृत्वरूपविशिष्टार्थविषयकज्ञानस्यैव तत्प्रयोजकतायाः सहृदयै रनुभूयमानत्वात्, 'यो निरोधो मया कृतः' इत्यादावेकपदेनोभयार्थोपस्थितेरभावाच्च ॥

एवं व्यञ्जनाया अनभ्युपगमे च्युतसंस्कृतत्वादे र्नित्यदोषत्वम्, दुश्श्रवत्वादेरनित्यदोषत्वमिति व्यवस्थाऽपि व्याहन्येत । तथाहि— व्यङ्ग्यार्थानुपगमे वाच्यार्थविषयकबोधप्रतिबन्धकतया वाच्यार्थापकर्षकत्वेन च तेषां दूषकत्वं वाच्यम्,

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यथा— 'दीनं* त्वामनुनाथते कुचयुगम्' इत्यत्र 'आशिषि नाथः' इतिवार्त्तिकेनाशिष्यर्थे विहितस्यात्मनेपदस्य याचनार्थेऽसाधुतया तदर्थस्याप्रतीतेस्तत्प्रयोजकस्य तस्यदोषत्वम्। एवमन्यत्रापि। तथाच सति वाच्यार्थस्य शृङ्गारे रौद्रे चैकरूपतया शृङ्गारे दोषो, न रौद्रे इतिकथं व्यवस्थेयमिति तस्यापि नित्यत्वापातात्।

व्यङ्ग्यार्थाभ्युपगमे तु तेषामनेकविधत्वेन तदपकर्षकस्यादूषकताप्रयोजकत्वेन शृङ्गाररसस्य व्यङ्ग्यत्वे 'कार्तार्थ्यम्†' इत्यादेस्तत्प्रतिकूलवर्णघटितत्वेन तदपकर्षकतया काव्यदूषकत्वम्। रौद्ररसस्य व्यङ्ग्यत्वेच तत्तद्वर्णानां तदनुकूलतया तत्त्वाभावस्य सम्भवात्।

एवं पर्यायाणामपि पदानां कस्यचित् कुत्रचित् काव्येऽनुगुणत्वम्, नतु सर्वेषाम्, यथा— 'द्वयं‡ गतम्' इत्यादौ कपालिपदस्यैव प्रतीयमानजुगुप्साव्यञ्जकनरशिरःकपालविशिष्टव्यञ्जकस्य, नतु वीरव्यञ्जकपिनाकविशिष्टबोधकपिनाकिपदस्य। तत्र पार्वतीं प्रति स्वनिन्दावादेन स्वस्यावरणीयत्वज्ञापनार्थं स्वेनैव भिक्षुरूपिणा निन्दावादस्योक्तौ वीरत्वख्यापनस्य प्रकृतार्थाननुगुणत्वादिति तदर्थमपि व्यञ्जनाऽवश्य मङ्गीकार्या। तथासति कपालिपदस्यैव जुगुप्साव्यञ्जकत्वात् तस्यैवानुगुणत्वस्य सम्भवात्।

---

* 'एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर-प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ॥ तत्पल्लीपतिपुत्रि! कुञ्जरकुलं कुम्भाभयाभ्यर्थना-दीनं त्वामनुनाथते कुचमुगं पत्रावृतं माकृथाः ॥'

† 'कार्तार्थ्यं यातु तन्वङ्गी कदाऽनङ्गवशव्वँदा ॥'

‡ 'द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः ॥ कला च सा कान्तिमती कलावत-स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥'

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एवम् 'अबलानां श्रियंहृत्वा' इत्यत्र प्राकरणिकार्थबोधोत्तर मसमर्थानां धनमपहृत्य जलवाहकैः पुरुषैः समं पुंश्चल्योरमन्त इत्यर्थान्तरस्य नैवाबला-वारिवाह-चपलापदैर्बोधस्य योगरूढ्या सम्भवः, स्त्रीत्वाद्यवच्छिन्नात्मकरूढ्यर्थाविषयकस्यैव बलाभाववत्त्वाद्यवच्छिन्नस्य तत्र बोधस्य चमत्काराधायकत्वात् । योगरूढपङ्कजादिपदानां पद्मत्वादिविशिष्टस्यैव पङ्कजनिकर्तृत्वाद्यवच्छिन्नस्य बोधकताया स्तत्रतत्र सिद्धान्तितत्वात् ।

लक्षणाऽऽदिनाऽबला-वारिवाहपदाभ्यां तादृशबोधस्य सम्भवेऽपि, चपलापदस्य पुंश्चल्यां रूढेरभावा न्न ततस्तस्या बोध इतितदर्थमपि व्यञ्जनाऽवश्यमङ्गीकर्तव्येतिदिक् ॥

एवं व्यवस्थापिताया अस्या वाक्यतदेकदेशादिनिष्ठायाः प्रत्येकमुदाहरणानि विस्तरभयादुदाहरणचन्द्रिकाऽऽदिषु विस्तरेण दर्शनाच्च नेह दर्शितानीतिशम् ॥

कविसरणि मनुप्रविश्य यत्नाद् ,
ध्वनिविषये निरणायि यन्मया तत् ॥
निखिलमपि समर्पितं भवान्याः ,
पदयुगले तनुयान्मनीषिमोदम् ॥२॥

इति तार्किकालङ्कारिकचूड़ामणि-मैथिलश्रोत्रिय-
'यदुनाथ' मिश्रप्रणीतो 'व्यञ्जनावादः'
सम्पूर्णः ।

शुभम्भूयात् ।



CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

व्यञ्जनावादसम्पादकस्य कियन्तिसंस्कृतपुस्तकानि

		मूल्यम्
१	राधापरिणयमहाकाव्यम्	१—०—०
२	रसमञ्जरीसुरभिः	१—४—०
३	भागवतप्रदीपः	०—१२—०
४	व्यञ्जनावादः	०—४—०
५	एकोद्दिष्टसारिणी	०—४—०
६	ध्वन्यालोकदीधितिः	(यन्त्रस्था)
७	गुणेश्वरचरितचम्पूः	,,
८	काश्यपकुलप्रशस्तिः	,,
९	अन्योक्तिसाहस्री	,,

प्राप्तिस्थानम्
'वैशाली' मुद्रणालयः
मुजफ्फरपुरम्

CC-0.Public Domain. CSDS (Sarai), New Delhi Collection. Funding by IKS